नीतिकामंदककी टीका

नं. ८०

[illegible] अथ [illegible] कामंदकीयम्.

नं ४७० घ

कामन्दकीयनीतिसार टीका

[illegible]

[illegible]

नीतिशास्त्र [illegible]

१

स्वबाह्याभ्यंतरं ६ ... त्रेतादियुगे चान्यः ४

॥श्रीगणेशाय नमः॥ प्रकृतिसंपत्प्रकरणे स्वामिप्रकृत्यभिन्नात्मिकात्मसंपत्तिगुणसंपादनेन आत्मा लब्धः अमात्यादिप्रकृतीनां
च स्वस्वगुणसंपादनेन आत्मलाभः संपन्नः एवं सप्तांगराज्यस्यात्मलाभः संपन्नः पालनं वाच्यं। तदिहाभिधातुमाह। लोके वेदे
च कुशलं कुशलैः परिवारितः आदृतः चिंतयेद्राज्यं सबाह्याभ्यंतरं नृपः। लोके लोकव्यवहारे लोकव्यवहारस्य च देशावलात्का
लवलाच्चान्योन्यस्थ्यभवति। तद्यथा। मध्यदेशेऽन्यो धर्मः पारसीकादिषु चान्यः। तथा कृतयुगेऽन्यः इति लोकव्यवहारे कुशलः वेदे
च कुशलः दूरस्य नेन लोकव्यवहारं वेदोक्तं च निरीक्ष्य उभयाविरुद्धं व्यवहरेदिति भावः तथा लोके वेदे च कुशलैः ऋजुभिः विभिः परिवारित
इति आदरं परिचिंतयेत्। पालनार्थं चिंतां कुर्यात् सबाह्याभ्यंतरविभागेन व्यवस्थितिराज्यं नृपो विजीगिषु राज्यस्य बाह्याभ्यंतरविभागं द
र्शयन्नाह॥ आभ्यंतरं शारीरं स्वं बाह्यं वा राष्ट्रमुदाहृतं॥ अन्योन्याधारसंबंधादेकमेवेदमिष्यते॥ आभ्यंतरं राज्यविगिषोः शारीरमेव स्वं
। तथा च कौटल्यः। राज्या राज्यमिति प्रकृतिसंक्षेप इति बाह्यं राष्ट्रमेवोदाहृतं। द्वेषाः प्रकृतयो राष्ट्राद्देवो स्यते। इति अन्योन्याधारसंबं
धादिति राज्ञा विना न राष्ट्रं न राष्ट्रं विना राजा वर्त्तत इति तस्मादेकमेवेदमिष्यते॥ इत्येतदेव दर्शयन्नाह॥ राज्यांगानां च सर्वेषां राष्ट्रा

नः

द्भवति संभवः। तस्मात्सर्वप्रयत्नेन राजा राष्ट्रं विवर्द्धयेत्॥ राज्यंगानां सर्वेषाममात्यादीनां राष्ट्राद्भवति संभवः राष्ट्रात्कोशः कोशाच्चतुरंगो
दंडः राष्ट्रस्य च भूम्येकांतरं मित्रं राज्ञ एव। स्वामीयं दुर्गं राष्ट्रादेव जानपदाद्योऽमात्याः तस्मात्सर्वप्रयत्नेन राजा राष्ट्रं प्रसाधयेत्। राष्ट्र
लाभं च पालनं कुर्यादित्यर्थः। तस्यानुग्रहमच्छिद्रं शरीरमनुपालयेत्॥ अनेनाभिसंबंधिना शरीरपालनमपि धर्माय भवति॥ राज्ञः संर
क्षणं प्रजासंरक्षणमेव धर्मो नान्यस्तथा च कौटल्यः॥ राज्ञो हि व्र[illegible]तमुत्थानं राज्ञः कार्यानुशासनं दक्षिणावृत्तिसाम्यं तु दीक्षा तस्याभि
षेचनं। एवंभूतस्य धर्मश्चारीरमेव साधनमिति॥ धर्मार्थिना विजीषुणा वं शरीरं यत्नेन रक्षणीयमित्यर्थः। प्रजारक्षणं चौरादिहिंसा
न भवतीति तद्धिंसाशंकितान्प्रत्याह॥ धर्म्या मारेभिरे हिंसां महर्षिकल्पा महीभुजः तस्मादसाधून्पापिष्ठान् हिंसन्दोषैर्न लिप्यते।
ऽत धर्मादनपेता धर्म्या हिंसामारेभिरे ऽवंतं महर्षिकल्पा ऋषिसमा एव यथा महर्षयोऽपि तेषु पश्वालंभनलक्षणं धर्मं कुर्वंतीति तथा राज्यर्ष
म्या योऽपि चौरादिनिग्रहरूपां धर्ममेव हिंसां कुर्वंति॥ तस्मादसाधून्ये चौरपारदारिकादीन् अन्यानपि पापिष्ठान्स्वामिद्रोहकारादीन् हिंस ह
न्दोषैर्न लिप्यत इत्यर्थः॥ धर्मसंरक्षणपरो धर्मार्थं विवर्द्धयेत्। येये प्रजारोद्धारस्तान्हन्यान्महीपतिः। वर्णानामाश्रमाणां स्वधर्म

२ रक्षणपरधर्मसंकरनिषेधात्।धर्मोपायैर्थं विवर्द्धयेत्॥अर्थार्ज्जनं वर्द्धनं च धर्माविरोधेनैवार्थं विवर्द्धयेत्॥ये ये प्रजानां दुष्टास्तान्ह- नि
न्यान्महीपतिः एवं हिंसादोषायन भवतीत्यर्थः॥धर्मस्वरूपमभिधातुमाह॥यमार्याः क्रियमाणं हि शंसंत्यागमवेदिनः सधर्मो यं विगर्हंति
वेः न तं धर्मं प्रचक्षते।यमार्याः साधव आगमवेदिनः।आगमज्ञाः शंसंति विधिनिषेधरूपमनुष्ठानं॥सधर्म एवं च देशकालजातिभेदेषु
मु विरुद्धं यं धर्मज्ञा विगर्हंति॥तमधर्मं प्रचक्षत इति॥धर्माधर्मौ विजानन्हि शासनेभिमुखः सतां॥प्रजा रक्षेन्नृपः।साधु हन्याच्च परिपंथि-
नः॥धर्माधर्मौ देशकालानुलोमप्रतिलोमतः प्राणिविहितौ नावधारयन्हि स्फुटं शासने वुपदेशे आभिमुख्येन रतः सतामाचार्या-
णां प्रजाः साधु यथा भवति तथा रक्षेत्॥उपद्रवेभ्यः हन्याच्च परिपंथिनः प्रजोपद्रवकारानिति।राज्योपघातं कुर्वंति ये।पापा राज-
वल्लभाः।एवैकत्रासंहता वा दूष्यास्तान्परिचक्षते पूर्वाचार्याः दूष्येषु कर्त्तव्यमभिधातुमाह॥दूष्यानुपांशुदंडेन हन्याद्राजाविलं-
वितं॥प्रदूष्य चाप्रकाशं हि लोकविद्वेषमागतान्।उपांशुदंडश्च प्रच्छिन्नवधः गुप्तविषदानयोगहतं न अथ च प्रदूष्योपायैर्दो-
षयुक्तान्कृत्वा लोकविद्वेषमागतान्।गूढन्यायाविशेषयुक्तान्पश्चाद्दासंस्थितान्नराः।रहस्येकांते मध्यमकक्षायामित्यर्थः।दू-

का: २

ष्यानुक्तलक्षणान्दर्शनायोपमंत्रयेत्। आह्वानयेत्। गूढचारास्त्वाः प्रच्छादितचारलीकाः पश्चात्तेषामासंत्तिनाराज्ञैवप्रागेव
तैर्हर्षैः सहतिंनीताः। प्रदीपलेनख्यापिताः तानन्तुप्रातश्चोपुरिति विज्ञातस्तान्विचिचर्चायुः। द्वास्थाः कक्षांतरागतान्तेचारास्त्वग्राहि
णो ब्रूयुः प्रयुक्तास्मइतिस्फुटंवानगूढचारास्तान्विचिन्वीयुः। बोधयेयुः। द्वास्थाः प्रतीहाराः कक्षांतरागतान्मध्यमकक्षांतरप्राप्ता
न्तेचचारास्त्वग्राहकाः एष्टाः संतः संकेतान्ब्रूयुः। प्रयुक्तास्मदूष्यैः स्वामिवधायेति स्फुटं। इतिहृष्यांस्तसंहृष्य प्रजानामपिवृद्धये
। तद्वेषान्विनीयुः नेतुमिच्छुः पदं राज्यं महदुत्कर्षं राज्यंवा लंहृष्यादिकं समुद्धरेत्च्छेदयेत्। प्रजावृद्धिः फलायभवती निदर्शोपर
माह। यथावीजांकुरः सूक्ष्मः परिपुष्टोभिरक्षितः। कालेफलायभवति साधुतद्वद्दिपंप्रजा। सम्यवीजांकुरः सूक्ष्मोयथाभिरक्षित
। निष्पत्तिकालेफलायभाति। साधुतद्वद्दिपंप्रजाप्रजारक्षणं। दुष्टदंडाद्भवति। तच्चचारास्त्वोत्तंश्रेय इति दर्शयन्नाह। वहूनपतिती
क्ष्णोनमृदुनापरिभूपते। तस्माद्यथार्होहीतांदंडंनयेसक्षमनाश्रितः। तीक्ष्णेनन्मापाद्धिकेनदंडेननहूजयतिप्रजा इतिशेषः॥
मृदुनानानुकंपयाप्रमायाहीनेनपरिभूपतेभयाभावात्। तस्मात्तेनकारणेनयथार्हितोयोपदंडंमर्हेतितस्पतंनयेन्। पक्षंपक्ष

२

यानमनाश्रितः।तथाचकौटल्यः।तीक्ष्णदंडोभूतानामुद्वेजनीयोभवति।मृदुदंडःपरिभूयते।यथार्हदंडःप्रजार्थकामैर्योजयतिकुप्र
णीतकामक्रोधाभ्यामज्ञानाद्वनप्रस्थपरिव्राजकानपिकोपयति।किमंगपुनर्गृहस्थानपि॥ ॥इतिकामंदकीयेनीतिसारटी
कायांकंटकशोधनोनामःषष्ठःसर्गः॥६॥ ॥कंटकशोधनशेषमेवात्मजरक्षणमभिधीयते।अरक्षिताःपुत्राःकंटकीभवं

३

ति॥पितुःप्रजानांचदर्शयन्नाह॥प्रजात्मश्रेयसेराजाकुर्वीतात्मजरक्षणं।लोलुभ्यमानार्थेषुहन्युरेनमरक्षिता॥प्रजात्म
श्रेयसेप्रजानात्मरक्षार्थंराजाविजिगीषुःकुर्वीतात्मजानांपुत्राणांरक्षणंकुतस्तद्रक्षतामिति।लोलुभ्यमाना लोभंगच्छंतो
अर्थेषुतदर्थंहन्युरेनंविजिगीषुमरक्षिताइति।राजपुत्रामदोन्मत्तागजाइवनिरंकुशाः।भ्रातरंवापिनिघ्नंतिपितरंचापमानि
ताः।सेवनादिमदोन्मत्तागजाइवनिरंकुशाःभ्रातरंराज्ययोग्यंनिघ्नंतिपितरंवाअहमेवराज्यार्हइत्यभिमानसंभावनयायु
क्ताइति।राजपुत्रैर्मदोन्मत्तैःप्रार्थ्यमानमितस्ततः।दुःखेनरक्ष्यतेराज्यंव्याघ्राघ्रातमिवामिषमिव।रक्ष्यमाणायदिछिद्रंक
थंचिन्मासुर्वंतिते।सिंहशावाइवघ्नंविनाशयंतिरक्षितारंपितरमेसंत्रायंरक्षाप्रकारंराजपुत्राणांसुश्लिष्टमभिधानमात

माह्। विनयोपग्रहात्। भृत्यैः कुर्वीत नृपतीति। सुतान्। अविनीतकुमारं हि कुलमाशु विशीर्यते। विनयो हि द्विविधः कृतकः सहजश्च
स्वाभाविको जन्मांतरवासनावशायातः कृतको विद्यावृद्धसंयोगजनितः॥ द्विविनयमनुपग्रहे बंधनयेषां ते तान् विनयोपग्रहान् भृ
त्यैः कुर्वीत नृपतिः सुतान्। अविनीतकुमारं हि राजकुलमाशु विनश्यति। तथा च कौटल्यः काष्ठमिव घुणजग्धं राजकुलमविनीतपु
त्रमभियुक्तमात्रं भज्येतस्मा। दृनुमसाम त्विजश्च कर्मैद्रबार्हस्पत्यं निर्वपयुः। आयन्मसत्ताप्याः कौमारभृत्या गर्भकर्मणि प्रसवने च विधीयमाने
प्रजातायाः पुत्रसंस्कारं पुरोहित। कुर्यात्समन्नं। तद्विदो विनयेयुरिति। एवंविधेन विनयोपग्रहेण रक्षेद्दितिभावः। कुर्वीत नृपतिः सु
तान्। अविनीतकुमारं राजकुलं विशीर्यत इति। विनीतमौरसं संपन्नं यौवराज्येऽभिषेचयेत्। दुष्टं गजमिवोद्वृत्तं कुर्वीत सुखबंधेनं
२ विनीतं द्विविधविनययुक्तं सं नक्षेत्रं नं यौवराज्येऽभिषेचयेत्। उद्वृत्तं च दुष्टं गजमिव। कुर्वीत सुखबंधनं। तथा च कौटल्यः। ग्राम्य
सुखोपरुद्धा हि राजपुत्राः पितरं नाभि— नंतीति। एवंविधसुखबंधनं कुर्वीतेति। राजपुत्रः परित्यागं सुदुर्वृत्तोपि नार्हति। किं नृपमा
नपरिसक्तपरानाश्रित्य हंतितं। सुदुर्वृत्तोपि परित्यागः राजवृत्तं नार्हति स न्यो न भवेति राजपुत्र इति। व्यसने सज्जमानं हि लेके राये

४

घस्रनाश्नये:॥ तथासंक्षेपार्थदेनंतथास्यासितगोचरः पितबंन्धः तथाचकोटल्यः। परस्त्रीषुमनः कुर्वाणामार्यव्यंजनादिभिः स्त्री
भिरमेध्याभिः — स्यागरिषुनर्हूजयेत्। मद्यपानंयोगपानेनयूतकामंकार्पटिकैः पुरुषैरक्षितरन्नपुत्ररक्षणमभिधायात्मनो
रक्षणंराज्ञोभिधातुंविषपादेवतावदाह। यानेशय्यासनेभोज्येपानेवस्त्रेविभूषणे। सर्वत्रैवाप्रमत्तस्यात्तदुर्जैतस्यविषदूषि
तं। पानंशय्यादिशिविकादिपर्यंकिकादि। आसनंसिंहासनंविष्टरकादिभोज्ये आहारादौपतितेपानीपादौवस्त्रेवस
नोत्तरीयादौसर्वत्रैवास्वस्त्रीसंसर्गादौअप्रमत्तः सावधानस्यान्नविश्वसेत्। तथा उज्ञेतवक्ष्यमाणलक्षणैर्विदूषितं। तंत्ता
त्वायदिहरेदित्यर्थः विषप्रतीकास्वस्त्रीसंसर्गादौअप्रमत्तः सावधानस्यान्नविश्वसेत्। तथाउज्ञेतवक्ष्यमाणलक्षणैर्वि
दूषितं। तंत्त्वात्वापरिहरेदित्यर्थः विषमतीकारार्थमाह। विषघ्नैरुदकैस्नातोविषघ्नमणिभूषितः परीक्षितमश्नीयात्।
लाङ्गुलोविषेद्विहृतं। तथाचकोटल्यः श्वेतपुष्करपुष्पहृंताकादिरक्तेस्नातस्यस्थानेगुप्तानिसर्वविषाणिनप्रसरंतइति।
तथाविषघ्नमणिभूषितइति। गरुडोद्गारविभूषितः तथाचोक्तंरचितोगरुडोद्गारमणिर्यस्यविभूषणं। स्यावरंजंगमंत॰

स्वविषंनिर्विषतांव्रजेत्।परिक्षितंवक्ष्यमाणप्रकारेणसमश्नीयाद्राजालांगुलीविषमिवघृतइति।महानुभाववृद्धसि-
द्धांतोयुक्तलांगुलीविषमिवमिषघृतंराजाभोजनंकुर्यादित्यर्थः।विदूषितपरीक्षामभिधातुमाह।भृंगराजशुकश्चै
वसारिकाचेतिपक्षिणः।।क्रोशंतिभृशमुद्विग्नाविषपन्नगदर्शनात्।भृंगराजःहस्तःपक्षीगोपुच्छकइतिप्रतीतः।शुकः
सारिकाचेतिपक्षिणःप्रतीताः।पक्षिणःक्रोशंतिभृशमुद्विग्नाविषपन्नगदर्शनात्।इतिप्रतीतं।चकोरस्यविरज्यं
तेनयनेविषदर्शनात्।भृंगराजःहस्तःपक्षीगोपुच्छकइतिप्रतीतः।शुकःसारिकाचेतिपक्षिणःप्रतीताः।पक्षिणः।।
क्रोशंतिभृशमुद्विग्नाविषपन्नगदर्शनात्।इतिप्रतीतं।चकोरस्यविरज्यंतेनयनेविषदर्शनात्।सुव्यक्तंमाद्यतिक्रौ
चोलोहितमस्तकः।पक्षीकोकिलोमत्तकोभूत्वाम्रियतेप्राणान्विमुंचतइतिजीवंजीवस्यचग्लानिर्जायतेविषदर्श
नात्।एषामन्यतमेनापिपरीक्षितंविषदोषरहितंसमश्नीयात्।नान्यथेति।मयूरएष्टातोत्सर्गेणभवंतिभुजगमा
तस्मान्मयूरएषातोभवनेनिसमुत्सृजेत्।मयूरःप्रसिद्धः।एषतश्चेनर्विदुःचित्रएकशृंगोमृगः।तयोरुत्सर्गेविमोक्षन

५

भवंतीते भुजंगमाः। तस्मान्मयूराच्चकोरकस्य। मयूरएषतो सर्गः सर्वान्नात्रायति। तस्मान्मयूरस्थतोभवनेनिसमुत्सृजेत्

। इतिप्रतीतं। भोज्यमन्नपरिक्षार्थं प्रदद्यात्सूर्वमग्नये। वयोमश्चततोदद्याततोलिंगानिलक्षयेत्। भोसंभोजनार्हमन्नं

5 परीक्षार्थंप्रदद्यात्। पूर्वमग्नयेवयोमश्चततोदद्यात्तन्नलिंगानिदर्शयेदिति। प्रतीतं। धूमोर्चिर्नीलतावह्नेः स्फोट

श्चजायते। अन्नेनविषदग्धेनवपुसांमरणंध्रुवं। वह्नेर्धूमस्यार्चिषांचनीलतारूक्षोपलक्षितंचस्फटंचजायते। त

थान्नेनविषदग्धेनवपुसांमरणध्रुवंतयेतितं। अश्वित्ततामोदकत्वमाशुचैसंविवर्णता॥ अन्नस्यविषदग्धस्यतल

क्षितंचस्फटंचजायते॥ तथान्नेनविषदग्धेनवपुसांमरणंध्रुवतयेतितं॥ अश्वित्ततामोदकलमाशुचैस्संविवर्णता।

। अन्नस्यविषदग्धस्यतथोन्मास्निग्धमेचकः। तीव्रेणवह्निनास्विन्नतानभवतीति। मोदकत्वंमदजनकत्वेमाशुचै।

संविवर्णतान्पामताच अन्नस्यन्नात्यादेः विषदग्धस्यऊष्मावाष्पास्निग्धमेचकोनीलोज्वलइति। व्यंजनस्या

शुशुष्कत्वंकथनंन्पामकेनता। गंधस्पर्शरसाश्चैवनश्यंतिविषदूषणात्। व्यंदैजनस्यद्रूषटाद्रसस्यवर्ष्मातेप्रनादिः

आशुत्रगी घ्रंशुष्कत्वंक्वथनमग्निंविनाप्यामफलतागंधस्पर्शरसाश्चैवनश्यंति विषदूषणात्। इतिप्रतीतं। छायातिरिक्ता
हीनावाद्रव्येस्याद्विषदूषिते। दृश्यते राजरूर्ध्वाचफेनडलमेवच। द्रव्येक्षीरजलमेवच। द्रव्येक्षीरजलघादौ छायादीतिरधि
काहीनावादृश्यतेविदूषितेराज्ञीरेखोर्ध्वाचरेफेनमंडलमेवदृश्यंतेइतिप्रतिद्रवराजीनावर्णानाह। रसश्चनीलायपसश्च
ताम्रामघस्यतोयस्यचके किलाभा। श्यामाचराधोविषदूषितस्यमध्येमेवदृष्टंगतो। चरेखा। इक्ष्वादिरसस्यनीलाराजीभ
वतित्र्येषंप्रतीतं। आर्द्रस्यसर्वस्यभवेत्तुसद्यः प्रम्लानभावोविदूषितस्या याकविनाक्वाथविनीलितावासंज्ञामताचेतिवदं
तितत्त्वाः। आर्द्रस्याम्रफलादेः सर्वस्याहरितस्यप्रम्लानभावःस्वंतप्रदेश्योक्काथंविनापिनीलताबान्यूनताभवेत्। त्र्येषंप्रती
तं। शुष्कस्यसर्वस्पविखोपदेहात् विशीर्णतावाशुविवर्णताच। खरंमम्रदुस्यान्मृदुनः खुरत्वंवदंतिकेचाल्पकजंतुघातं। शु
ष्कस्यवल्लरस्यवटकादेः। विखोपादेहात् विशीर्णता। तंतूनांयक्ष्मणांलोम्नांस्याध्वंसश्चविषाश्रयात्। प्रावरणानिकंबल
लादीनि आस्तरणानिहंसरोमकर्पासतूलिकादीनितेषांश्यामैर्मलिनैर्मंडलैराकीर्णतातंतूनांतरुविरचितानांयक्ष्मरा

६

6

जयो विशिष्टमृगरोमनिर्मितानां लोम्नां विशिष्ट अविलोमनिर्मितानां भूरा: ग्रातनं स्यात्। विषश्चापाद्विषोपदेहादित्यर्थः। लोहानां चमणीनां मल[illegible]पंकोपदिग्धता। प्रभावस्नेहगुरुतावर्णस्पर्शवधस्तथा। लोहानां सुवर्णादीनां मणीनां मणीनां च विदूर्यादीनां विषाश्रमान्मलपंकोपदिग्धता। कलंककिट लिप्तता प्रभावो वीर्यं सर्वोपद्रवनिषेधः। स्नेहः। स्निग्धता। गुरुत्वं। वर्णो लोहितपीतादि स्पर्शः सुखस्पर्शत्वं एतेषां च वधो विनाशः तथेति संस्कृत विषाश्रपातन हि सामान्यविशेषा लोहमणीनां प्रभावो विनाशः पिशुनः कातेशति। विषदापिनाम पिलिंगान्यभितुमाह। संशुष्कश्यामवक्त्रत्वं वाग्भंगो जृंभणं मुहुः। सवलनं। वपथुः स्वेद अविगो विदिग्विलोकनं। संशुष्कत्वं वक्त्रस्य स्वदोषदंडभयभावनाएवं श्यामवक्त्रत्वं वाग्भंगो विवक्षार्थं चासक्तता भवति। स्पष्टार्थं वक्तुं न पातीत्यर्थः। जृंभणं मुहुरिति सुप्तोत्थितस्येव भवति स्खलन समेपि मार्गे प्रस्खलन वेपथुः कंपः वं शीताद्यभावेपि स्वेदः प्रवातेपि आवेगः उद्विग्नता। निमित्तं तस्य भावेपि दिग्विलोकनं दंडप्रणेतुः पुरुषगामनं शंकयेति स्वकर्मणि स्वभूमौ स्यात्। अनवस्थानमेव च। लिंगान्येतानि पुष्यं लक्षयेद्विषदापिनां। स्वकर्मणि स्वयाकयेया

घनुष्ठानेस्वभूमौरसवतीगृहादौ अनवस्थानंदोषपरिहारबुद्ध्या अह मन्नवावस्थित इति संकल्पेन लिंगान्येतानि विपुलं लस
येत्। विषदाविनामितिप्रतीतंविषप्रयोगप्रतिषेधार्थमाह। अवधा। अवधानि च सर्वाणि पानपानीयमेव च। तत्कल्पकैः समा
खाद्यप्राश्नीयाद्भोजनानि च। रूपधाभिचिकित्सकैः यथा योगं पानपेयोद्रवं पानीयमेव च। तत्कल्पकैः प्रतिष्ठाद्याश्वास्वादं प्रा
हयित्वा भोजनानि च प्राश्नीयाद्भोजेति। प्रसाधनादिय त्किंचित्तत्सर्वं प्रतिचारकाः। उपनिन्युर्नरेंद्राय सुपरिक्षितमुद्रितं। प्रसा
धनमलंकाराः आदिग्रहणात् विलेपनमाल्यादि। यत्किंचिदन्यदापेवस्तु तत्सर्वं सुपरीक्षितां समुद्रितं मंत्र्यादिभिः परिचा
रकाः उपनिन्युर्नरेंद्रायनान्यथेति। परस्मादागतं यत्तु तत्सर्वं सुपरीक्षयेत्। स्वेभ्यः परेभ्यः परमंडलस्थेभ्यः। रक्षानियुक्तैः तथा
चकोटस्पःरक्षिताराज्ञारक्ष्यआसन्नेभ्यपरेभ्यश्चेति। यातंवाहनमारोहेतज्ञातंज्ञातो यथाद्दितं। अविज्ञातेन च यथा संकटे
न चनं व्रजेत्। पानंशिबिकावाहनंहस्त्यश्वादिआरोहेत्। ज्ञातमिति ज्ञातस्वभावे। ज्ञातेनैव विश्वास्येन कर्मकरेण हस्त्यश्व
वाहनोपपादितं हौकितं। अविज्ञातेनस्वयमनुचरैर्वा मार्गेणासंकटेनाविस्तीर्णेन न व्रजेत्। परद्वतान्तिसंधानप्रतिषेधार्थमि
रक्ष्योराजाभिरक्षिभिः ४

ति। परप्रयुक्ततीक्ष्णारभसादिप्रतिषेधमाह। अशितादुष्टकर्माणमासंवंशक्रमागतं। सविभक्तं च कुर्वीत जनमासन्नवर्त्तिनं।
दुःकर्मस्वामिविरुद्धाभरणं नवीक्षितं। कदाचिद्विषयस्थतं प्राप्तं योग्यं वंशक्रमागतं पितृपैतामहं संविभक्तं। स्वतजीविका-
संविभागं सुबुभुक्षितः किं न करोति पापामिति। एवंविधं जनमासन्नवर्त्तिनं राजात्मरक्षार्थं कुर्वीत येनाभिधातुमाह। अधा-
र्म्मिकांश्च क्रूरांश्च दृष्टदोषान्निराकृतान्। परेभ्योऽभ्यागतान् विवर्जयेत्। अधार्मिकाः पापाः क्रूराः हिंसाः दृष्टदोषाः प्रत्यक्षी-
कृतत्राणाः विरुद्धारणाः निराकृता दोषादेव निर्द्धारिताः परेभ्यः शत्रुभ्योऽभ्यागता ये तांश्च सर्वान् दूरतः परिवर्जयेत्। अ
वर्ज्जनीयास्तु आसन्तरकर्माणस्तेषु शत्रुवुद्धिर्माभवत्विति कौटल्यः। जलपथे आत्मरक्षार्थं महामहावातसमुद्भूतां सुप
अन्यनौप्रतिवद्धां तां नौपायेन नवमातुरां। महत्वातैरयानुद्धृतां स्थिरतारमिसर्यः सुपरिक्षितनाविकां आसन्तरं नाविकामि
सर्यः। अन्यनौप्रतिवद्धां तां नौपेयान्नावं तन्ममज्जो। हितीयाया अपिनाशो भवेदिति। आतुरां चटुर्घट्टितत्वादनवस्थितां। ना
रोहेदिति। जलक्रीडायामप्यात्मरक्षार्थमाह। परितापिषु पश्यन् स्तटलेखा स्थिमाप्तसैन्यचक्रं। परिशोधितमीनचक्रजा

वायसरेजु १

7

तंव्यवगाहेतजलंसुहृत्समेनः। परितापिषु ग्रीष्मादिदिवसेषु पर्यन्नपि स्वयमेव प्रत्यक्षीकुर्वन् जलतलं वेरवास्थितमात्मसैन्यच॰
क्रं शुचिविशोधितमीनचक्रजालमीनसाहचर्यात्मकरशिशुमारग्रहादयो विगृह्यंते। तेविशोधिता अपनीतायस्मिन् तदव
गाहेतजलंसुहृत्। समेतइतिइष्टजनयुक्तः। वनविहारमभिधातुमाह। गहनानिविसर्ज्य यन्विशुद्धं वहिरूधानवनंसमन्व
पेतः। विरहन्मधुरंवयोनुरूपंनचमाघेद्धिषमोपभोगरागात्। वनेयानिगहनानिलतास्तंवसंकटानिविसर्जयेत्। विशुद्धं
रात्रिभिवर्हिरंतश्चक्षतत्रशोधनमुद्यानवनंसमभ्युपेयात् गच्छेन विरहन्मधुरविलसनवयोनुरूपंनचमाघेत। मंदं
गच्छेद्विषयोपभोगरागात्। मृगयानमभिधातुमाह। सुविनीतमुवेगे दृष्टयानं। सुगम्यां सुचिताचलक्षसिद्धौ। सुपरिक्षि
तरक्षितां तमीमां लघुकोष्टश्चमृगाटवीमुपेयात्। सुविनीतो अश्वो हस्ती वा आचार्येणानीकस्थेन वायो ग्राहितवेगः सुवे
गश्चोभनवेगः। तस्दृष्ट्यानस्सुगम्यामुचिताचलक्षसिद्धै। सुपरिक्षितरक्षितांचसीमां लघुकोष्टैर्मृगाटवीमुपेयात्। इपरयह श्वदिकोष्ट
प्रवेशेतिधाममभिधातुमाह। कारयेद्वनशोधनमादौमानुरंतिकमपिप्रविविक्षुः। आसन्नास्त्वनुगतः प्रविशेद्वसंकटेषुनं

८ गहनेषुनतिष्ठेत्।आदौप्रथमेवभवनशोधनंकारयेत्।तीक्ष्णादिनिरासार्थंमातुर्जनन्याःसमीपमुपविविक्तप्रवेषुगातञ्छः।

४ आप्तैःशास्त्रिभिरनुगतःसविशेषसंकटेषुगहनेषुनतिष्ठेत्।अपायस्थानत्वादिति।पांसूत्कराकर्षिणिवातिवातेसंसक्त

धाराजवदेवमेघे।शीतातपेचापितथांधकारेस्वस्थस्सन्नक्वचिदाभ्युपेयात्।पांसूत्करोधूलिसमूहःतदावर्षिणि।

दा णिवातिवातेसंसक्तधाराजलौपकेमेघेपर्जन्येअसातपेतथांधकारेस्थोनिराकुलःसन्राजानक्वचिदभ्युपेयात्।पां

हा सूत्करोधूलिसमूहस्तेषुपरद्रोणामवकाशत्वात्।तथानिर्गमेचप्रदेशेचराजमार्गेसमंततःसर्वतःप्रोत्सारितजनंगच्छे

त्।सन्यसम्यगाविःकृतोन्नतिःशरीरसौष्ठवप्रगटनार्थमिति।यात्रोत्सवसमाजेषुजनसंबाधनमालिनःप्रदेशान्नाव

गाहेतनातिवेलंतुसंतपेत्।यात्रादेवायततीर्थादिकंप्रति।उत्सवःपुत्रजन्मविवाहादिकः।समाजोजनसमूहस्तेषुजनसं

बाधमालिनोजनसंबाधमालाश्रितःप्रदेशान्नावगाहेत।परप्रयुक्तानामवकाशत्वात्।नातिवेलंनातिक्रांतसंपातवेलंसं

पतेत्।गमागमनंकुर्यादिति।निशीथप्रणिधानमाह।निबद्धवितानवर्मधरैःकंचुकोष्णीषधारिभिः।अंतःपुरेषुविचरेत्कुल

कैरातवामनैः वर्षधराः खटाः तैः कंचुकोष्णीषधारिभिः कंचुकः चारवाणः उष्णीषः शिरोवेष्टनं तद्धारिभिः स्त्रीणां चितविकारो मा
भवत्विति। अंतःपुरेषु निशावासेषु विचरेत्॥ राजा कुब्जकैरातवामनैः सह। कुब्जाः चक्रावयवाः किराता निर्गतपृष्ठाः अ-
ल्पशरीरा तैरपि सहेति। नीचैरंतःपुरामात्याः शुचयश्चितवेदिनः। शास्त्रासिविषवत् हि नमीययुः महीपतिं। नीचैः सेवोद्ध
समयहाय अंतःपुरामात्याः अंतःपुररक्षानियुक्ताः शुचयः कामोपधाविशुद्धाः चित्तवेदिनः। चित्तज्ञाः शास्त्राग्निविषवर्जैरंगो
पजीविभिः करणभूतैः नर्मयेयुर्महीपतिं। शास्त्राग्निविषाः अपायहेतुत्वात् वर्जनीया इति। अंतरवंशिकसैन्यं हि संनद्धं
साधुसंमतं। रक्षेदायुक्तकुशलमंतःपुरगतं नृपं। अंतरवंशिकः अंतर्वंशो राज्ञः पुत्रदारादौ विनियुक्तः पुत्रदारराजआ
भ्यंतरो वंशः तत्र नियुक्तः। तस्येति वद्धं सैन्यमंतर्वंशिकसैन्यं हि स्फुटं संनद्धं। गृहीतशस्त्रसंनाहं साधुसंमतं। सकलगु
णसंयुक्तत्वात् नृपरंज्ञोत्। किंभूतमायुधकुशलमिति। आयुक्तस्थाने कुशलं रक्षाविधाने निपुणमित्यर्थः। अंतःपुरगतं
नृपमिति अन्येषां तत्राऽनवकाशत्वात् इति। आशीतिकाः पुरुषाः पंचाशत्काश्च योषितः। बुध्यरन्नवरोधानां शौच

८

माकारिका श्चये आशीतिका। पूर्णाशीति वर्षाः पुरुषाः पंचाशत्काः पूर्णपंचाशद्वर्षा योषित उपशांतरागत्वात् विप्लवो न
भवतीति बुध्येरन्। अवरोधानां मंतःपुराणां शौचं भवतीति। भर्तृत्वं। आगारिकाः आगारे नियुक्ताः। स्त्रीणामलंकारादिमा
ह। रूपाजीवाः स्त्रियः रूपाजीवाः स्त्रियस्नाताः परिवर्त्तितवासः राजानमुपतिष्ठेयुर्विशुद्धाश्च विभूषणाः। रूपमेवाजीवंतीति
पण्यस्त्रियः स्नाता राजकीयम जन एव परिवर्त्तितवासस इति। राजकीयैर्वस्त्रैरेव परिवर्त्तितानि स्ववासांसि यकाभिस्ता राजा
नमुपतिष्ठेयुः। विशुद्धा विभूषणा रसधूपांगप्रलेपनानि कानि बृहत्स्पर्धकुरुवे जटिलैश्चैव मुंडैश्चाभ्यंतरो जनः। संसर्गं नक्व
चिद्गच्छेत् वाह्यैर्दासीजनैस्तथा। कुहकामाश्चंद्रनालविदः जटिलाजटाधारिणः शैवादयः। मुंडा भिक्षुगणादयस्तैश्चाभ्यंत
रो जनः। अंतःपुरसंचारिजनः संसर्गं संबंधं न कचिद्गच्छेत् परमयुक्तरसाद्यभिधानभयादिति। वाह्यैर्दासीनर्तनैर्वेश्यादि
भिः संसर्गं न गच्छेत्। विटप्रवेशादिसंसर्गनिषेधार्थमिति। निर्गच्छेत् न दिशश्चापि सर्वश्चाभ्यंतरो जनः विज्ञात द्रव्य संचारी
कारणे। नोपलक्षितः। निर्विशेत् न विशेच्चापि आभ्यंतरो जनो अंतः पुरसंचारी विज्ञातान द्रव्य संचारी [illegible] द्वारस्थै
रस्थै।

विज्ञातानांद्रव्याणामेवसंचारणंविद्यते। यस्यकारणेनोपलक्षितोराज्ञाविदितेनैवप्रयोजनेनलक्षितोविदितोपीतिस्य
क्रामिकव्याधिप्रतीकारार्थमाह। नचानुजीविनंपश्येदकल्यंपृथिवीपतिः। अन्यत्रासयिकाद्रोगात्सर्वस्यैव। नरोगुरुः। न
चानुजीविनंभृत्यंपश्येदकल्यंव्याधितंपृथिवीपतिः। व्याधिसंसर्गनिषेधार्थमा[illegible]न्यत्रासविकाद्रोगादिति। यदिमुख्योनुजी
वीःऽस्यपकारिणामभिभूयतेतदापश्येदात्मनाप्रतीकारंकृत्वाकस्मादित्याह। सर्वस्यैवातुरोगुरुः समंचादिस्थितोपिद्रष्टव्य
रावणस्त्वमनुजीविनोनुरक्ताभवंतीति। देवीदर्शनक्रममभिधातुमाह। स्नातोनुलिप्तः सुरभिः स्रग्वीरुचिरभूषणः। स्नातां
स्वदत्तवसनांपश्येद्देवींसभूषणां। राजास्नातोतिशुद्धकायत्वादनुलिप्तः कुंकुममृगमदादिभिः सुरभिः स्रग्वी[illegible]सुरभयो
तिसुगंधामालतीमल्लिकादिस्रजः रुचिरभूषणोभास्वराभरणः देवीनामनोहरोभूत्वातच्चित्ताराधनार्थंस्नाताविशुद्धवस
नांदेवींपश्येत्। अलंकृतां। स्वानुरागवृध्यर्थं। परातिसंधाननिवारणार्थमिदं। नहिदेवीगृहंगच्छेदात्मीयात्संनिवेशनात्
। अत्यर्थंवल्लभोपीहती श्वासंस्त्रीषुनव्रजेत्। नहिनैववरिंमयादेवीगृहंगच्छेदात्मीयात्संनिवेशनात्। वालगृहात्। असंतं

९

10

वल्लभोपि हि कलौ विश्रंभविश्वासं राजा न व्रजेत्। विश्वस्तानां स्त्रि विना हमाह। देवीगृहगतं भ्राता भद्रसेनमपमारयत्। मातुःश्श
य्यांतरेलीनः कारूषं चौरसः सुतः। देवीगृहगतं भद्रसेनाख्यं भ्राता कनीयेन निषिद्धप्रवेशो वीरसेनाऽनुरक्तपादेव्या भेरि

सुतः

तो। मारयत तथा मातुः श्य्यांतरे लीनः कारूषं कारूषविषयाधिपं। औरसःऽपुत्रोंत्तरदत्तराज्यं कुपितया मात्रया मेरितो। मारय
दिति वर्त्तते। लाजान् विषेण संयोज्य मधुनेति विलोभितं। देवि तु काशिराजानं निजघान रहोगतं। लाजान् विषेण दे
वी तु काशिं। एकांतस्थमिति शेषः। विषदिग्धेन सौवीरं मेखलामणिना नृपं। नूपुरेण च वैरंत्यं जारूषं दर्पणेन च। विषाक्ते

ष

न मेखलामणिना सौवीरविषयाधिपं। नूपुरेण वैरंत्याख्यं नृपं आदर्शेन जारूषाख्यं नृपं जघान स्पर्शादिति। श्रूयात वेणं
ण्यां स खड्गं समाधाय तथा पि विदूरथं। अहिवृत्तपरिहारे तन्मंत्रौ चापि प्रयोजयेत्। यथा स्वभार्याभिरेव गृहागतः शत्रुर्विनाश्य
त एव। इति गुप्ते फलं दर्शयितुमाह। यस्य दाराः सुगुप्तास्युः पुरुषैराप्तकारिभिः सर्वभोगान्वितं तस्य हस्ते लोकद्वयं स्थितं। य
स्य पुंसः राज्ञो वा दाराः कलत्राणि सुगुप्तास्युः पुरुषैराप्तकारिभिः आप्तं हितं ये कुर्वंति। तैः सर्वभोगान्वितं सर्वकामावाप्तियुक्तं।

लोकद्धयं तस्य हस्ते स्थितं परलोकेपि कुलकलंकाभावात्स्वर्ग इति। धर्मार्थं चाभिधातुमाह। धर्ममिच्छन्नरपतिः सर्वान्दाराननु-
क्रमात्। गच्छेदनुनिशं निसंवाजीकरणबृंहितः। धर्ममिच्छन्नरपतिः सर्वान्दाराननुक्रमात् शास्त्रोक्तक्रमेण गच्छेत् प्रतिनि
शं निशं निसंसम्यग्वाजीकरणैः शास्त्रोक्तैर्बृंहितः कृतशुक्रवृद्धिः। शयविधिमभिधातुमाह। विचार्य कार्यावयवान्दिनक्षये
विसर्ज्य लोकं मदात्कृतशिखिय। अनात्मवधोनहि साधुपालिता रूपेद सत्तं परमाप्तररक्षितः। विचार्य निर्णीयकार्यावयवान होरा व
त्रं षोडशधा विभज्य अहोरात्रायथेषु कार्यावयवाः तान्निवसं दिनक्षये विसर्ज्य लोकं मम दाभिरेव कृताः सकला अपि क्रिया
यस्य पुरुषेण अंतःपुरप्रवेशाभावात्। अनात्मवधेन हि पाणिनास्वकीयकरेण सर्वदाकरसंनिहितं शस्त्रं विधेयमिति। स्वपेन्नि
न्निशांगच्छेत्तत्राप्यसक्तं निद्रायामप्यासहितेन कर्तव्येति परमाप्ताये अंतरवासिकपुरुषास्तै रक्षितः इति। निद्रासक्तिनिरासार्थमाह
नयेन ज्ञातनस्य निशांतरे स्वैरं सुखस्वपं तंन्। हनिराधय॥ प्रमत्तचित्ते स्वपित्र सद्ग पातप्रजागरेणास्य जगत्प्रबुध्यते। नयेन निसनु-
ष्ठानेन प्रहरद्वयरात्रिं च विभज्य राज्यनियुक्तानुष्ठानेन जातस्य प्रमत्तत्वेन तत्सर्वं करणीयं। नरपतिर्निरे स्वैरं सति सुखं स्वपति

१२ ॥

हनिसधबोनिर्गतमनःपीडाः प्रजाइवउपद्रवकारिणांनिग्रहात्ममत्तचित्तेनरेश्वरे प्रमत्तंविषयासक्तं चित्तं यस्मिन् प्रसादेत्रविष

यासक्तिःकोटल्यस्येनोक्ता। तथाहृष्टादिश्विंद्रियार्थेप्रसक्ते प्रसादेस्थयिनिस्वामितिभयादुपद्रवकारिभ्यप्रजागरेणास्यरा

तोजगत्सकलंप्रजारूपंप्रकर्षेणावुध्यते। तस्मात्सततोत्थेनराज्ञाभवितव्यमिति। इतिस्यपूर्वेमुनयोवभाषिरेतृपस्यराज्यस्य

चसाधुरक्षणं। तदेतदेवंपरिपालयन्मयान्नरेश्वरःपालनकल्पतांव्रजेत्॥ इतिःराजपुत्रारक्षणंनामसप्तमःसर्गः॥ स्वमंडल

परमंडलानिविजेतुमंडलमेववि चारयन् मंडलयोनि मंडलशोधनप्रकरणमभिधातुमाह। उपेतः कोशदंडाभ्यांसामा

त्यः सहमंत्रिभिः। दुर्गस्थश्चिंतयेत्साधुमंडलं मंडलाधिपः उपेतःसंपन्नःकोशदंडाभ्यांप्रकृतिसंपयुतः स्थवरजगतैराज्ञा त

विशुद्धेमंडलेचरन्। अशुद्धमंडलेअयंरथ्चक्रवत्। विशुद्धिश्चमंडलस्यमित्रत्वेनापनं — नुमध्यामोदासी

नाअपियदाविजीगीषोःमित्रभाविभोभवंतिशुद्धंमंडलंतन्नचरन्राजानेविधयमंडलत्वात्। अविशुद्धमंडलेकालापःस

स्याशुद्धत्वात्। रथचक्रंविशीर्यते चंचलमपिरथचक्रादिकंविशीर्यतेविजिगीषोर्द्धिगुणंभवतीतिततश्चराजानविराजते

इतिमंडलशुद्धिःविधेयेतिभावः विजीगिषोः स्वमंडलापेक्षमभिधातुमाहरोचतेसर्वभूतेभ्यः श्रीमानखंडमंडलः।संपूर्णमंड
लस्तस्माद्विजीगिषुस्तदाभवेत्।रोचतेप्रियोभवेत् चतुर्वर्णादिभ्यः श्रीमान्।श्रीवावामताशुरिवाखंडमंडलस्तस्माद्विजीगिषुसदाभ
वेत्।सप्तप्रकृतिकंराज्यमंडलमभिधीयते।ताश्चसप्तापिप्रकृतय।स्वगुणसंपदुपेतायदाभवंतितथासंपूर्णमंडलमुपेतःएवं
संपूर्णमंडलसदाभावदिति।एतदेवसमर्थनाह॥ अमात्यराष्ट्रदुर्गाणिकोशोदंडश्चपंचमः एताःप्रकृतयःपंचविजीगीषोर्भोग
लैनोदाहृताः।भोक्ताविजीगिषुरासगमतिभावः।एताःपंचतथामित्रंपंचम।पृथिवीपतिः।सप्तप्रकृतिकंराज्यंइत्सवाचबृहस्प
तिः एताअनंतरोक्ताःप्रकृतयपंचतथामित्रंसप्तमःपृथिवीपतिः।सप्तमप्रकृतिकंराज्यमित्युवाचबृहस्पतिस्सुरःगुरुःएवंमंडल
गुग्रहयोविजीगिषोरधिकारस्तत्संस्तानिरुक्ताः।तल्लक्षणानिचाभिधातुमाह।संपन्नस्तुप्रकृतिभिर्महोत्साहःकृतश्रमःजेतुमे
षणाशीलश्चविजीगुरितिस्मृतःप्रकृतिभिरुक्तलक्षणाभिःसंपन्नःसमृद्धःमहानुत्साहोयस्यशौर्यममर्षोदाक्ष्यंचोत्साहगुणा
इतिकौटल्यःकृतश्रमोभ्यस्तसर्वायुधादिः।जेतुमेषणाशीलस्तेतिविजिचित्तत्तानावुद्धिमन्वंमार्गंप्रसंसवादिता।कुलीनस्य

लू१

लंम्रष्टगणावुद्धिर

भावः कौलीन्यं अभयकुलविशुद्धता वृद्धसेवित्वं विद्याविद्धसेवा तत्परतानत्साह उक्तलक्षणः। स्थूललक्षिता दानावसरे स्थूलं बहु व
लक्षीकरोति। स्वदातुं न जानाति सर्वः। कृतज्ञता कृतं जानातीति कृतस्य प्रत्युपकारं करोति वुद्धित्वं वुद्धित्वं प्रागल्भ्यमपरीषद्भीरुत्वं।
सत्यवादिनः अमृषावादित्वमिति। अदीर्घसूत्रता क्षौद्रं प्रत्ययः स्वप्रधानता। कदेशाकालज्ञता दार्ढ्यमापल्लेशसहिष्णुता। सूत्र्यंते
पर्यालोच्यते कार्यमिति तद्दीर्घसूत्रं तस्य भावो दीर्घसूत्रता तस्या अभावदीर्घसूत्रता दीर्घकारितेति। अक्षौद्रं क्षुद्रं परगुणासहिष्णुः। नक्षु श्री
द्रोऽक्षुद्रः। तस्य भावः प्रश्नायोऽनुद्धतं स्वप्रधानता। आत्मायत्तसिद्धत्वं देशकालज्ञता कार्यानुगुणौ देशकालौ जानातीति तस्य भा
वः दीर्घं दृढत्वं परगृहीतापरित्यागः। सर्वक्लेशसहिष्णुता सुतरां। ज्ञाततया क्लेशान्सहत इति तस्य भावः। सर्वविज्ञानता दाक्ष्यमू
र्जो संभृतमंत्रता। अविसंवादिता शौर्यं भक्तिज्ञत्वं कृतज्ञता। सर्वविज्ञानता सकलकलाकौशलं दाक्ष्यमाशुकारित्वं ऊर्जा कायब
लवत्वं संभृतमंत्रता इंगिताकाराद्यगोपनात् अविसंवादिता वाक्छलाद्यनभिसंधानशीलता। शौर्यमभीरुत्वं भक्तिज्ञत्वमनु
जीव्यादिकृता भक्तिं जानातीति तदीर्घवर्जिता। शरणागतवात्सल्यं शरणं प्रविष्टानां स्निग्धोपचारात्पूर्वकं रक्षणं। अमर्षित्वमयकारि

सर्वविज्ञानता।

षुन्नांतिः।अचापलंस्थैर्यंस्वकर्मदृष्टशास्त्रत्वंराज्ञांस्वकर्मप्रजापालनंतत्रायुधसाध्यंसमस्तकलायुधविषयेदृष्टानिशास्त्राणितस्यभावः

स्तीपंडितःपांडित्यादान्वीक्षिकोपरिज्ञानित्वंदीर्घदर्शितादीर्घदेशेनकालेनयत्व्यवहितंशास्त्रचक्षुषाचद्रष्टुंशीलंयस्यतस्यभा

वः।जितश्रमत्ववाग्मित्वमकृपरिचारता।प्रसूती।स्फीतता।चेतिविजिगीषोर्गुणोदयः।इत्यभिहितगुणैर्विजिगीषोःअभ्युदयोभ

वतीति।उत्साहगुणस्यैवप्राधान्यंदर्शयन्नाह।सर्वैर्गुणैर्विहीनोपिराजाजयःप्रतापवान्।प्रतापयुक्तात्त्रस्यंतिपरेसिंहान्मृगा

इव।सर्वैरनंतरोक्तैर्गुणैर्विहीनोपिराजारंजनाजयःप्रतापवान्प्रतापयुक्तात्त्रस्यंतिपरेसिंहान्मृगाइतिप्रतापश्चोत्साहशक्ति

मित्रशत्रूपृथक्पृथक्चतुर्णांचात्राकमंडलंविक्रमालासःप्रभाषतेइतिमतांतराणिसर्वाणिदेशाचाराद्भवंतीतिभावः।एतदेवस

मर्थयन्नाह।प्रभावसिद्धोनृपतिप्राप्नोतिपरमांश्रियं।तस्मादुत्थानयोगेनप्रतापंजनयेत्सदा।प्रकर्षेणतापयतिशत्रूनिति।सक

लशत्रुविकर्त्तनजनितंचयशःप्रतापशब्देनाभिधीयतेतस्यसिद्धोसत्वांनृपतिर्महतींश्रियमश्नुते।तस्मादुत्थानयोगेनसत

तंविग्रहेयोगयोगेनप्रतापंजनयेत्सरभसत्वस्पष्टंतेनप्रतापेनोयतसंहादस्त्रारी।जकमंडलंवशेभवतीतिभावः।विजिगीषोर्लक्ष

णामभिधातुमाह। एकार्थाभिनिवेशित्वमरिलक्षणमुच्यते। दारुणस्तु स्मृतः शत्रुर्विजिगीषुर्गुणान्वितः॥३॥ एकार्थो भूमिहिरण्यादि तं
त्रैकस्मिन्नर्थे अविनिर्वेशः आत्मसाकरणाय ग्रहाद्वयोरपि यत्नः। तदेकार्थाभिनिवेशित्वमरिलक्षणं तौ परस्परमरी भवतः स
च द्विप्रकारः दारुणः सुखोच्छेद्यश्च। दारुणं दर्शयितुमाह। दारुणस्तु स्मृतः शत्रुर्विजिगीषुर्गुणान्वितः॥ ये विजिगीषोर्गुणास्ते
यस्य स दारुणः छेद्यः। अत आत्मनो दुरुच्छेद्यत्वाद्विजिगीषुः आत्मसंपादनीयाद्भूतिभावैः॥४॥ सुखोच्छेद्यं दर्शयन्नाह॥ लुब्धः क्रूरोऽल
सोऽसत्यः प्रमादी भीरुरस्थिरः। मूढो योधावमंता च सुखोच्छेद्यो रिपुर्मतः॥५॥ लुब्धः। अर्थलाभाद्दानशक्तिरहितः। ततश्च प्रकृत
यो विरज्यन्ते क्रूरो नितीक्ष्णदण्डः ततो जनीयो भवतीति। अलसो निरुद्योगः। तस्य प्रकृतयोऽपि निरुद्योगा भवन्ति। स[ह]शीलस्तच्छी
ला प्रकृतय इति वचनात् सा विद्यते यस्य। भीरुः शौर्यरहितः स संग्रामासमर्थो भवतीति। अस्थिरः। स्थितेरहितत्वात् प्रकृतिभिस
ज्यते। मूढो निर्विवेकः सत्त्वकिंचनकारी भवति। योधावमंता शुद्धविज्ञारदशूरपुरुषावमानकृत्। स योधविमुक्तः सुखेनैवोच्छे
द्यते। स सुखोच्छेद्यो रिपुः स्मृतः॥५॥ विजिगीषोरारमित्रस्य च लक्षणान्यभिहितानि। इदानीं विजिगीषोर्यातव्यं प्रति पिपासोः रयतः य

मि ३

श्चादासन्नव्यवहितभेदेनारिमित्रादीनां संज्ञांतराणि व्यवहारार्थमभिधातुमाह। अरिमित्रमरेर्मित्रमित्रमतः परं। तथारिमित्र
मित्रं च विजीगिषोः पुरस्सृताः॥ विजीगिषोर्भूम्यनंतरकादिदिग्भागेषु व्यवस्थितारिप्रकृति ज्ञात्वा एकवचनमिति बहवोऽपि भूमा
नंतर पुरःस्थितामरिमित्रमिति तथैव भूम्येकांतरमित्रं अरिमित्रं अरिमित्रमिति तथैवारेर्भूम्यंतरस्यैकानंतरमरिमित्रमिति मित्रम
तः परमपि विजीगिषोर्भूम्येकानंतरं मित्रं तस्यापि मित्रं तस्यापि भूम्येकांतरं मित्रमिति यारिमिति थारिमित्रं चेति विजीगिषोर्भूम्यनंत
रस्यारेर्भूम्येकांतरं अरिमित्रं च विजीगिषोः पुरोग्रतः स्मृताः। पृष्ठगाश्च तेभ्यः पश्चाद्व्यवस्थितानां संज्ञांतराण्याह। पार्ष्णिग्राहः स्थि
तः पश्चादाक्रंदस्तदंतरं। आसारावनयोश्चैव विजिगीषोस्तु मंडले॥ पश्चात्स्थितो विजीगिषोर्भूम्यनंतरस्त्वासारावुभयोश्चेति
पार्ष्णिग्राहस्याक्रंदयोरासारो मित्रं तद्यथा। पार्ष्णिग्राहस्य यः आसारः पार्ष्णिग्राहासारः एवं आक्रंदासार इति पश्चाद्राजानः पुरस्ता
त्पंचमध्यो विजीगिषुरिति दृष्टं राजकामेदं मंडलं विजीगिषोः संबंधि अरिप्रकृतेरेव बलापेक्षं संज्ञांतरमभिधातुमाह॥ अरेश्च
विजीगिषोश्च मध्यमो भूम्यनंतरः॥ अन ग्रहं संहतयोनिग्रहे व्यस्तयोः प्रभुः॥ अरेर्यातस्यापि भूमानंतरो रिपुः विजीगिषोरप्यरिपुरेव

मित्र

उभयोररिभावात्। अरित्वमित्रत्वयुक्तः। अनुग्रहे संहतयोः अरिविजिगीषोरकीभूतयोः अनुग्रहे कोशदंडाभ्यामुपकारे प्रभुः स
मर्थस्तदपेक्षयाद्यानन्तरात्तित्वात्। तयोरेव व्यस्तयोर्भिन्नयोर्निग्रहे दंडने प्रभुः। एकैकमध्यमस्यस्य युद्धे समर्थो न भवतीति मंड
लाद्बहिः रेतेषामुदासीनो बलाधिकः। अनुग्रहे संहतानां व्यस्तानां च वधे प्रभुः एतेषां विजीगिषुरिमध्यमानां मंडलाद्बहिर्भा
गाद्बहिः सांतरः विजीगिषोर्भूम्यनंतरो बलापेक्षया च उदासीनो बलाधिकः। अनुग्रहे संसतानामरिविजीगिषुमध्यमानां पू
र्ववत् प्रभुः। व्यस्तानां च वधे प्रभुरिति। मूलप्रकृतयस्त्वेताश्चतस्रः परिकीर्तिताः। आहेतत्तंत्रकुशलश्चतुष्कं मंडलं मंडलमपरे
मूलम प्रकृतयस्त्वेताश्चतस्रः परिकीर्तिताः। आहेत्तत्तंत्रकुशलश्चतुष्कं मंडलमपरे॥ मूलभूताप्रकृतयस्त्वेताश्चतस्रो
पास्तु खाहण्यप्रयोगसंनिहततराश्च परिकीर्तिताः। आहेतत्तंत्रकुशलो नीतितंत्रप्रवीणश्चातुस्सं चतुर्भेदभिन्नं मंडलं नपा
ख्य आचार्य आह विजीगिषुररिर्मित्रं पार्ष्णिग्राहश्च मध्यमः। उदासीनपुलोमैद्रौ षट्कं मंडलमूचतुः। विजिगिषुरुक्तलक्षणः
अरिर्वातव्याख्याः मित्रमग्रतो यातव्य भूपानंतरं मध्यमोदासीनौ कृतलक्षणावेव संनिहितत्वात् षट्कं वा हुरुपयापार इति।

पुलोमजाचीपतिा इश्चतौषड्कंषड्रेदं मंडलमूचतुः।११॥ उदासीनोमध्यमश्चविजीगिषोस्तुमंडलं। उशनामंडलमिदं प्राहद्वादशराज
कं।१२ उदासीनमध्यमौ हृतलैक्षणो विजीगिषोमंडलमनंतरमेवोक्तं द्वादशराजकां एवमुशनादैत्यगुरुः मंडलं द्वादशराजकंप्राह। १२
द्वादशानांनरेंद्राणामरिमित्रे पृथक्पृथक् षड्विंशक मिति माहते च ते च पुनर्मयः।१३ अनंतरोक्तानां द्वादशानां नरेंद्राणां मित्रामि
त्रैः पृथक्सहं ति द्वादशत्रिकाः षट्त्रिंशद्भवंतीति षड्विंशक मंडलं ते च द्वादशनरेंद्रास्ते च तन्मित्रामित्रौ चतुर्विंशतिरितिष
ट्त्रिंशक मंडलं। पुनरपि मयो मन्यते॥१३॥ द्वादशानां नरेंद्राणां पंच पृथक्पृथक्। अमात्याद्याश्च प्रकृतीरामनंतीह मानवाः द्वाद
श मंडल नरेंद्राणां पंच पृथक्प्रत्येकमित्यर्थः। अमात्याद्याश्च अमात्यराष्ट्रदुर्गकोशदंडाख्याः प्रकृतीरामनंतीति विगणयंती
ह मानवाः मनुशिष्याः १४॥ ततश्च किं भवंतीत्याह। मौला द्वादशायास्त्वेता अमात्याद्यास्तथा नृपाः। सप्ततिस्त्वधिका ह्येका सर्वप्रकृति
१५॥ मंडलं। मौला द्वादश या पार्थिवा मित्र प्रकृतयः पंचकस्या अमात्याद्याः तथा चयाः। एकत्र सप्ततिह्येषा सर्वप्रकृतिमंडलमिति। मानवामन्य
न्तेयतो यथा अमात्यादिभिरपि विना सह वा द्वादशप्रयोगो वियत इति। १५। बृहस्पतिरप्यभिधानमाह॥ संयुक्तस्त्वरिमित्राभ्याममध्यारिस्त

15

त्तथासुहृत्। मौलाद्याश्चाराजानश्चसषड्दिशाकंगुरुः॥१६॥ उभयारिर्विजिगीषुर्मध्यस्तस्य योर्भूम्य। नंतरत्वात् उभयारिसकार्याभिनिवेशामरि-
लष्यामिति वचनात्। एवंमुपसामयम एव भवंति। एवमष्टादशराजकंमंडलंगुरुर्मन्यंते। अष्टादशानामेतेषाममात्याद्याः पृथक्पृ-
थक्। अष्टोत्तरशतं ह्येतन्मंडलं काव्ययोविदुः॥१७॥ अनंतरोक्तानामष्टादशानामेतेषाममात्याः पृथक्पृथक्। अष्टोत्तरशतं ह्येतन्मंडलं
व.वपोविदुः॥१८॥ अनंतरोक्तानामष्टादशानामेतेषाममात्याद्याः पृथक्पृथक्। चतुःपंचाशत्कमंडलं विशालाक्षः प्रभाषते॥१९॥ विम-
तांतराणि सर्वाणि देशकालपर्यपेक्ष्यासार्थकानीति द्रष्टव्यानि। चतुःपंचाशतं राज्ञाममात्याद्याः पृथक्पृथक्। चतुर्विंशति-
संयुक्तमंडलंत्रिंशतंमतं॥१८॥ अनंतरोक्तानां चतुःपंचाशतां राज्ञामसमात्याद्याः पृथक्पृथक्। चतुर्विंशतिमंडलं त्रिशतं। चतुर्विं-
शत्यधिकत्रये ऽपरंमंडलं कल्पयंती सार्थः। समूहवाचित्वान्मंडलशब्दस्य॥१९॥ सप्तप्रकृतिकं यत्तु विजिगीषोररिश्चतत्। च-
तुर्दशकमेवेदंमंडलंशार चक्षते॥१८॥ विजिगीषोरारश्चतत् सप्तप्रकृतिकं राज्यं चतुर्दशभेदभिन्नं मंडलं समूहं परिचक्षते षाड्गु-
ण्यप्रयोगस्य संनिहितत्वात्॥२०॥ मंडलत्रयमित्याहु विजिगीषोरिमध्यमाः। मित्रयुक्ताः पृथक्पृथक्तेतैस्तैबद्धा मित्यपरे जगुः। मंडलत्र

१८

यमित्साकृत्रयावयवविधमंडलं विजिगीषुरिमध्यमाः मित्रयुक्ताः पृथक्पृथक्। मित्रेण जगुराचार्या इति॥२१॥ अमात्याप्रकृतयमे
कैकस्येह भूपतेः। मंडलं मंडविदः षड्विंशत्कं प्रचक्षते॥२२॥ अमात्यांप्रकृतयएकैकस्यानंतरोक्तभूपतिषट्कस्य मंडलविदः षड्विंशत्कं
प्रचक्षते। परे गुरवः॥ सप्तप्रकृतिका विजिगीषुरिमध्यमाः एकविंशतिकं प्राहुरपरे रैरखादिन इति प्रतीतं॥२३॥ चत्वारः पार्थिवा मौला
पृथग्मित्रैः सहाष्टकं। अमात्यादिभिरेवे च जगत्यक्षरसंमिताः॥२४॥ चत्वारो मौला विजिगीषुरिमध्यमोदासीनाः पृथग्मित्रैः सहाष्टकं मं
डलमिति शेषः। अमात्यादिभिः पंचभिः प्रकृतिभिरेते च पार्थिवा जगत्यक्षरसंमितमिति जगती छंदः। पादचतुष्टये अष्टाचत्वारिं
शदक्षराणि भवंतीति। अष्टाचत्वारिंशत्कं मंडलमिति। चतुर्विंशतिर्भवंतीति चतुर्विंशतिमंडलमिति॥२५॥ विजीषोः पुरस्ताच्च येच
पश्चात्प्रकीर्तिताः। दशकं मंडलमिमं मंडलज्ञाः प्रचक्षते॥२६॥ इति व्याख्यातं पूर्ववद्दशानां भूमिपालानाममात्याद्याः पृथक्पृथक्। मं
डलं मंडलविदः षष्टिसंज्ञं प्रचक्षते। श्लोकव्याख्यानं प्रतीतं॥२७॥ अरिमित्रे गुरोर्नेतुः पश्चिमे ते च पंचकं। अमात्याद्याः पृथक् चैषां त्रिं
शत्कं परिचक्षते॥ अरिमित्रे नेतुर्विजिगीषोः पुरोग्रतो भूम्यानंतरभूम्येकांतरौ पश्चिमौ च तथैव च। भूम्यनंतरभूम्येकांतरविजी

16

गीषुणा सह पंचकं। तथा। अमात्याः एष्यकूचैषां त्रिंषत्कं परिचक्षते। अरेरप्येवेति द्वे एहे इष्टिमतं तथा। पंचकं मंडलं साऽप्यं त्रिंशत्कं च
मनीषिभिः। यथा विजीगीषोस्तथान्यात्रेोरनंतरो मन्यायेन पंचकं त्रिंशत्कं चेति सर्वयोज्यं। द्वौ एव प्रकृती न्याय्ये इत्येवं वा च परा
सरः। अभियोक्ता प्रधानास्यात् तथान्यान्याभियुज्यते। न्याय्येन्यायोपपन्ने इत्येवं वा च परासरः मुनिः। अभियोक्ता विजीगीषुस्त
थान्यायाभियुज्यते यात व्याख्या। परस्पराभियोगेन विजीगीषोररेस्तथा। अरिश्च विजीगीषुश्च एका प्रकृतिरेकतः। परस्पराभि
योगेन यथा विजीगीषुणा। अरिरेव परिणापि विजीगीषुरभियुज्यते। एवमेव विजीगीषुरभियोक्ता तथा त्वात्तुरपि। अरिरपि ए
वं च स एवारिः स एव विजीगीषुरित्यतः कारणात् एका एव प्रकृतिः किं रिस्सेक प्रकृति। किमिदं मंडलमित्यपसंहरन्नाह। इतिप्र
कारैर्बहुधा मंडलं परिचक्षते। सर्वलोकप्रतीतं तु स्फुटं द्वादशराजकं। इति प्रकारं बहुधा मंडलं परिचक्षते। पूर्वाचार्याणां कामंदा
किना बहुश्रुतित्वख्यापनार्थे अयं ग्रंथविस्तरदोषोपि न गणितः। इति। सर्वलोकप्रतीतं तु स्फुटं द्वादशराजकमिति। तदेव सम
र्थयन्नाह। अष्टद्रा खं चतुर्मूलं षष्टिपत्रं द्वये स्थितं। षड्गुण्यं विपलं हसं यो जानाति सनीतिवित्। मंडलं वृक्षत्वेन रूप्यते चतु

रिसेक प्रकृति ८

मूलमिति विजीगीषुरिमध्यमोदासीना इति। चत्वार्यपि मंडलानि मूलानि यस्य अष्टशाखमिति विजीगीष्वादीनां चतुर्णां मूलतानां अरि

मित्रे प्रत्येकमष्टौ राजानो द्वैव शाखा यस्य षष्टिपत्रमिति विजीगीष्वादिद्वादशानां नृपाणां प्रत्येकममात्याद्याः पंच पंच प्रकृतय इति याः

षष्टिः ता एव पत्राणि यस्य द्वये स्थितमिति। दैवे पुरुषकार इति। यद्देवद्वयमाधारभूतं तं च मते स्थितं। षड्पुष्पमिति संधिविग्रहासन-

यानसंश्रयद्वैधीभावा षड्गुणा या य... पुष्पाणि यस्य त्रिफलमिति क्षयस्थानं वृद्धिरिति त्रयो ये षाड्गुण्यस्य फलभूता उत्तममध्यमा-

वरलाभाः तान्येव फलानि यस्य एवं मूलं मंडलवृक्षं यो जानाति स नीतिवित्।33। इति मंडले षाड्गुण्यप्रयोगमभिधातुमाह। पार्ष्णिग्रा-

हस्तथासारः शत्रुमित्रे प्रकीर्तिते। आक्रंदोऽथ तदासारो विजीगीषो रुदाहृते।34। विजीगीषो यातव्यं प्रति गच्छतः पार्ष्णिग्रहणेन विघ्न-

विधायी पृष्ठतो भूम्यनंतरः तदासार इति। पार्ष्णिग्राहस्यैव भूम्येकांतरं मित्रं द्वावपि शत्रुमित्रे प्रकीर्तिते। शत्रोः पातव्यस्य मित्रे आ-

क्रंद इति। पार्ष्णिग्राहस्य भूम्यनंतरः विजीगीषुणा पार्ष्णिग्राहविग्रहणार्थमारुंधते। आह्वय इति तदासार इति। आक्रंदस्य भू-

म्येकांतरो जात आपद्विनाशार्थमासरतीति। द्वौ तावपि विजीगीषो रुदाहृते। विजीगीषोर्यातव्यं प्रति रुदाहृते। मित्रे इत्यनुवर्ततेऽस्य

र्थः॥ पुरोयायी द्विगृह्यैव मित्राभ्यां पश्चिमावटी। पश्चिमाविव पूर्वाभ्यां अरितन्मित्र [illegible] मि [illegible] वेचा॥ पुरोग्रतो यातव्यं प्र
तीपायात् विगृह्यैवेति विग्रहं कारयित्वा मित्रियाभ्यामाक्रंदासाराभ्यां पश्चिमो एष्टस्यावरीया पार्ष्णिग्राह मित्रे पश्चिमाविव पूर्वाभ्यां मित्रमित्र
मित्राभ्यां अरिमिति यातव्यं। तन्मित्रमपि यातव्यं मित्रं विगृह्य विग्रहं कारयित्वा इति वर्त्तते॥ अरिमित्रस्य मित्रं तु हतहतसेन भूयसा सं
स्तभ्यो मयमित्रेण पश्चाद् हृच्छेन्नरेश्वरः। अरेर्मित्रस्य यातव्यमित्रस्य पुरतो यन्मित्रं तत्र हतहतसेन महीयकारेण भूयसोपचित
त्राक्तिनास्तं स्तभ्य निरुद्ध विरुद्ध चेष्टं कृत्वा गंतव्यमित्रं स्तंभितं कृत्वा अभयमित्रेण उदासीनेन विक्षोभेण किमिस्पसौस्तं भयति। इति
चेत् विजीगीषुणा हतहताः हत इति एवं कृत्वा पश्चाद् हृच्छेन्नरेश्वरो मासैति॥ एतदेव समर्थयन्नाह। आक्रंदेनात्मना चैव पार्ष्णिग्रा
हं प्रपीडयेत्। आक्रंदेन तदासारमाक्रंदासारता जिनौ॥ आक्रांदनात्मना मध्यस्थं पार्ष्णिग्राहं प्रपीडयत्। आक्रंदेन तदासारमिति पा
र्ष्णिग्राहासारं भजति य आक्रंदस्तेन पीडयेदिति वर्त्तते॥ पुरस्ताद् द्विधेयमभिधातुमाह॥ स्वमित्रेणात्मना चैव कुर्वीतोद्धरणं रिपोः।
मित्रेण सस्वमित्रेण रिपुमित्रं प्रपीडयेत्॥ मित्रेण पुरस्ताद्व्यवस्थितेन आत्मना चैव कुर्वीतोद्धरणं उच्छेदनं यातव्या स्वयं रियो मित्रेण सस्वमि

त्रेणारिपुमित्रं पातव्यमित्रं प्रपीडयेत्। ४० अरिमित्रस्य मित्रस्य पीडनं पृथिवीपतिः। कुर्वीतोभयमित्रेण मित्रमित्रेण चैव हि। ३९ अरिर्यो
न व्यस्तस्य यन्मित्रं तस्यापि यन्मित्रं तस्य पीडनं पृथिवीपतिः। कुर्वीतोभयमित्रेणा[illegible]तरं[illegible] पूर्वोक्तेन मित्रमित्रेण विजीगीषुर्मित्र
मित्रेण चैव हीति प्रतीतं। ३५ अनेन क्रमयोगेन विजीगीषुः सदोत्थितः। पीडयेदहितं शत्रुं मित्राणि [illegible]तरांतरा। ४६ अनंतरोक्तक्रमयोगे
न विजीगीषुः सदोत्थितः। सर्वदा यकारिणं शत्रुं भूम्यनंतरकारणौ मित्राणि जायंते। अपकारात्व्यकारणैः शत्रवो जायंते। अप
कारात्व्यकारयोः शत्रवो जायंते। उपकारात्व्यकारयोः शत्रवो जायंते। उपकारायकारो हि लक्ष्यं लक्षणमेतयोरिति वचना
त्। रिपवो येन जायंते कारणं तत्सम्त्सृजेत्। ४७ विजीगीषुर्न केवलं मुख्यान् जगति मित्रत्वेन स्थापयेत्। क्षुद्रकानपीति दर्शयन्ना
ह। ४८ प्राधान्येन हि सर्वत्र सर्वा संसर्गपेस्रजाः। तासां संसर्गणाद्राजा सर्वांगीश्रियमश्नुते। प्राधान्येन मुख्यतया सर्वत्र स्थानी
याद्द्रोणमुखकर्पटपतनादिदर्शग्रामादिषु स्वो जनयदेयथायोगं परजनपदेषु वर्णाश्रमलक्षणाः प्रजा सामादिभिरानुरू
प्येण संसर्गयेत्। अनुरंजयेत्। अनुरागो हि सार्वगुण्यमिति वचनात् सर्वसंसर्गणादेद्रो व्यंजनानुरंजनाद्राजा सर्वांगीश्रिय

मश्नुते। प्रियो हेतुत्वादुपचारात्पृथ्वी श्रीरुपचर्यते। तस्याश्चांगानि चतुःसमुद्रावसानवर्त्तिनो विषया एवंभूतानि सर्वाण्यं गानि यस्यां स्तां

१८ प्रियमश्नुते व्याप्नोति चक्रवर्त्तित्वेनाधिपतिर्भवतीत्यर्थः ॥५१॥ एतदेव समर्थयन्नाह। दूरे चरान्मंडलिनस्तथान्यान्दुर्गवासिनः। मित्रीकुर्वीत

ते त्नेनाः साधयतीह मंगलं ॥५२॥ दूरेचरानतिव्यवहितान्मंत्राद्यामनंतराश्थितिं संस्थान्यायेनपीड्यमानो स्कभयतः सदोद्युक्तैर्मैर्हेतुभिः

रिपुरुच्छेदमायातितद्धुरोवावतिष्ठते पीड्यमानो स्कभयतः एकतो विजिगीषुणान्यतो विजीगीषुमित्रैः क्रमोत्क्रमं व्यवस्थितैः सदो

द्युक्तैर्मनीषिभिः प्राप्तैरिपुरुच्छेदमायाति तद्धुरो विजीगीषुवावतिष्ठते। इति ॥५३॥ उभयमित्रस्यात्मसा त्करणमाह। सर्वोपा र्थ

यैः प्रकुर्वीत सामान्यं मित्रमात्मसात्। भवंति मित्राद्विच्छिन्नाः सुखोच्छेद्या हि विद्विषः ॥५४॥ सर्वोपायैः सामोपप्रदानादिभिः सामान्यं श

त्रोरात्मनः साधारणं। तदात्मसात् आत्मन एवासाधारणं कुर्यात्। कस्मादित्याह। भवंति मित्राद्विच्छिन्ना विश्लेषिताः सुखोच्छेद्याः निःस

पस्मात् हायत्वात्। शत्रवः इति ॥५४॥ अरेरपि मित्रापादनार्थमभिधातुमाह। कारणैश्चैव जायंते मित्राण्यरिपवस्तथा। हीयवीर्येन जायेते। कार

णं तत्समुत्सृजेत् ॥५५॥ कारणैर्हेतुभिरेव जायंते मित्राण्यरिपवस्तथा गुपकाडलिनो द्वादशराजकादिभिर्बहिर्भूतान् रथान्यानदुर्गवा

तस्मारिमित्राण्यपिमित्रीकुर्वी।

सिनआटविकान्मित्रीकुर्वीतेत्यर्थः॥ ५५ कस्मादित्याह॥ तत्राणास्तद्वशंभाक्तजनाःसाधयंति॥ इहमंडलमिति॥ ५६ ज्ञानाचेकवचनंपरमंड
लानिसाधयंतीत्यर्थः॥ सर्वधर्ममभिधातुमाह। ५७ चलोच्चहूर्जितबलोमध्यमोविजीगीषयाएकीभूयारिणातिष्ठेत अशक्तःसंधिनान
६० मेत्। तऊर्जितबलः शक्तित्रयसंपन्नोमध्यमोविजीगीषया चलेद्भियायाद्विजीगीषुस्तदाएकीभूयारियायातवेनसहह
तसंधिस्तिष्ठेत्। अशक्तश्चेत्संधिनाहेतुभूतेनकोशादिभिरुपनमेत्। ५८ उदासीनेचविजिगीषतिसर्वेमंडलिनःसह।सर्वेधर्मेणतिष्ठेयु
ऽप्रणमेयु रशक्तयः। उदासीनेविजीगीषया विजीगीषतिसर्वेमंडलिनविजिगीषुरिमिलित्वासहमध्यमाः।सहमिलित्वासर्वधर्मेणतिष्ठेयुः।आत्म
रक्षार्थंसंनमेयुरशक्तयः ४०॥ उक्तक्रमेणसंधिधर्मंव्याख्यातुमाह।समुत्पन्नेषुकृच्छ्रेषुसंभूयस्वार्थसिद्धये।संपत्स्यतरणांसम्यक्सर्वधर्म
४१ इतिस्मृतः॥ कृच्छ्रेषुमहाव्यसनेसंभूयमेकीभावमुपेत्यस्वार्थसिद्धये आपत्स्यतरणांसम्यक्कुर्वंति। यतदितिवाक्यशेषः। तत्सर्वधर्मत्वमि
४२ तिस्मृतं। अरिविग्रहोयास्तेषुचविजिगीषोर्वृत्तमभिधातुमाह। सहजकार्यजश्चैवद्विविधःशत्रुरिष्यते। सहजस्वकुलोत्पन्नमितरः
४३ कार्यस्मृतः सहजस्वकुलोत्पन्नोदायादादिरितरकार्यजः। एकार्थाभिनिवेशत्वात्कार्येजायतइतिद्विविधशत्रुरुच्यतेइति।उक्ते
जः

दापचये काले पीडनं कर्शनं तथा। इति विधाविदः प्राहुः शत्रौ वृत्तं चतुर्विधं॥ उच्छेदः स्वभूमेः परित्यजनं। पीडनकर्शने स्वयमेव वक्ष्यति॥
कालेन कुले इति विद्याविदो दंडनीतिविदः शत्रौ विषयभूते वृत्तं चतुर्विधं विजिगीषोः प्राहुः रेवनं कोशदंडाभ्यां महामात्रवधस्त
था। एतत्कर्शनमित्याहुराचार्याः पीडनं परं। तन्मंडलं दाहविलोपादिकरणमिति। उच्छेद्यमभिधातुमाह। समाश्रयविहीनो
वा दुर्वलं वास्तमाश्रितः। शक्योरिः संपदायुक्तमुच्छेत्तुं भूम्यनंतरः॥ समाश्रयो दुर्गबलीयान्। तद्विहीनः तद्रहितः। दुर्वलं वास
माश्रितः शक्योरिः संपदायुक्तः सुखोच्छेद्यो येर्धर्मैः शत्रुर्भवति तानाह। लुब्धकूरोलसोसत्यः प्रमादी भीरुरस्थिरः। मूढो यो
धावमंता च सुखोच्छेद्यो रिपुस्तथा। एवंभूतयारि संपदायुक्त सुखोच्छेद्यो रिपुः स्यादिति। कर्शनपीडनयोर्विषयमभिधातुमाह। क
र्शनं पीडनं काले कुर्वीतश्रयमानिनः। समाश्रयं दुर्गमाहुर्मित्रं चासाधुसंमतं। कर्शनं तनूकरणं पीडनं कर्शनादभ्यधिक
दुःखोत्पादनं। महामात्रवधादिकं काले देशकालाद्यानुकूल्यसमये कुर्वीत विजिगीषुराश्रयमानिन इति। समाश्रयातिमान
वतः समाश्रयो दुर्गमाहुर्मित्रं वासाधुसंमत इति। सहजोरिपुः सर्वथोच्छेद्य इति एवंविदर्थ्यमाह। विभीषणस्य सोदर्यो यथा

सूर्यसुतस्य च। सर्वतंत्रापहारित्वात् तयोश्छेद्यो निजो रिपुः॥५६॥ विभीषणस्य सोदर्यो रावणो यथा छेद्यः सूर्यसुतस्य सुग्रीवस्य सोदर्यो वालि
जो रिपुः सर्वतंत्रापहारित्वात् तंत्रमत्र राज्यं तत्सर्वमपहर्तुं शीलमिति तस्माद्धेतोर्निजो रिपुरुच्छेद्य एवेति। सोदर्यः कस्मादुच्छेद्य इत्यत्र
आह। छिद्रं मर्म च वीर्यं च विजानाति निजो रिपुः। दहत्यंतर्गतश्चैव शुष्कं वृक्षमिवानलः॥५७॥ छिद्रं रक्षास्थितिशैथिल्यादि मर्म युक्तामियु
क्तमात्रो म्रियते। तथा वीर्यं वलवत्तां च विजानाति। यो रिपुः सोदर्यादिरसावंतःस्थितो दहति शुष्कं वृक्षमिवानलः। इति तस्मादुच्छे
द्य एवेत्यनेकेवलं शत्रुविशेष एवोच्छेद्यः मित्रविशेषोच्छेद्यतामिति दर्शयन्नाह। वर्तते पक्षपातेन मित्रं चेदुभयात्मकं। वज्रीवाहित्रि
शिरसं तदुच्छिंद्यात्कृतत्वरः॥५८॥ यद्यरिविजिगीषोर्मित्रमुभयात्मकं भूत्वा अरिं पक्षपातेन वर्तते विश्वस्ते विजिगीषावपकरोमीति।
कृताध्यवसायं तदुच्छिंद्याद्वज्रीवइंद्र इव त्रिशिरसं कृतत्वरं यद्यरिविजिगीषोर्मित्रमुभयात्मकं भूत्वा अरौ पक्षपातेन वर्तते। वि
श्वस्ते विजिगीषावपकरोमीति। कृताध्यवसायं तदुच्छिंद्याद्वज्रीव इंद्र इव त्रिशिरसं कृतत्वरं शीघ्रतरमित्यर्थः। त्रिशिरा देवविशे
ष एव दानवातिरिंद्रस्यामित्रं स दानवाधिपतौ सुतरां स्निग्ध इत्यवज्रिणा निहत इति। कार्यवैरादरेरपचये विधेय इति दर्शय

न्माह। वलिनाविगृहीतस्याद्यियताह्मद्ध वर्त्तिनः। कुर्वीतीपंचमंत्रात्रो रात्मोच्छितिविस्त्रांकया। वलिनोपचितत्वांकया भूम्यनंतरात्नअ
रावुच्छिन्नेवलिभूम्यनंतरो भवति वलवत्वाद्विजीगीषुमप्युच्छिंद्यादिति। त्वांकया भूम्यनंतरारेरप्युपचयः कार्यएवेति। एतदेवसमर्थ
यन्नाह। यस्मिन्नुच्छिद्यमानेपिरिपुरन्यः प्रवर्तते। न तस्योच्छितिमातिष्ठेत कुर्वीतैर्नस्वगोचरं। यस्मिन्भूम्यनंतरा— वच्छिद्यमानेरिपुरन्यः
प्रवर्त्तते। न तस्योच्छित्तिमातिष्ठेत्कुर्वीतैर्नस्ववशात्रुं स्वगोचरं भत्सभावैस्यापयेदिति। वंशागतो रिपुर्यस्तु विचलेदुरुपद्रवः। तस्य सं
त्रामनायाश्रुतकुलीनं त्रामेर्द्ययेत्। वंशानुगतः स्वकीयकुलप्रभावो रिपुरेकोर्थ्याभिनिवेश्ची विचलेत्। व्यभिचरति दुरुपद्रवः
। कथमप्यसौ साध्वर्जुनयाति। तस्य संत्रामनायत्रासनं मन्योया शत्रुश्रीघ्रं तत्कुलीनं तदायदायांदन्त्रामं नयेदुच्छापयेदयमेव
तत्प्रतीकार इति। विषं विषेण व्यथते वज्रं वज्रेणाभिद्यते। गजेंद्रो दृष्टसारेण गजेंद्रेणैव बध्यते। विषं स्थावरविषेण व्यथते नि
वीर्यत्रिपतेनान्यैर्व वज्रं वज्रेणैव भिद्यते नान्येन गजेंद्रो दृष्टसारेण गजेंद्रेणैव बध्यते। नान्येन। मत्स्यो मत्स्यमुपादत्ते ज्ञातिर्ज्ञाति
मसंशयं। रावणोच्छितये रामो विभीषणमपूजयेत्। तत्सूचितमर्मप्रहारैरावणउच्छिन्नः। द्वेषं प्रतीतमिति हा दत्रामंडला

नेतर ६५

राधनायाह। यस्मिन्मंडलसंसौं भवते। भवतिकर्मणि। कुर्यात्तमेधावीप्रकृतीरनुरंजयेत्॥ यस्मिन्कर्मणिकृतेमंडलद्वादशराजक
रसासंक्षोभोअसर्वोदक्षमाभवति। तन्नकुर्वीतमेधावीविजिगीषुः प्रकृतीरेकादशापिराजप्रकृतीतदीयामात्यादिकाश्चप्रकृतीर
नुरंजयेत्। एवंसकलमंडलेष्टोभवतिनेता ६४ स्वपरविभागेनप्रकृतीषूपायप्रयोगमाह॥ सामदानेनमानेनप्रकृतीरनुरंजयन्। आ
त्मीयाभेददंडाभ्यांपरकीयासुदारयेत् ६६। आत्मीयाः प्रकृतीर्मित्रादिकाः सामदानेनचयथोचितपूजयासर्वाएवानुरंजयेत्। परकी
यास्तुशत्रुतन्मित्रादिकाभेददंडाभ्यांदारयेत्। वधादिसर्थः ६५॥ मित्रादीनामप्यात्मीयत्वंकादाचित्कमितिसतदृष्टयन्नाह॥ आत्मी
मंडलं४ यंसर्वमित्रैररिभिरेवच। सर्वस्वार्थपरोलोकः। कुतोमध्यस्थताक्वचित् ६७॥ मंडलंचक्रवर्तिक्षेत्रेसर्वनिरवशेषमात्मीयंमित्रैररिभि
रेवच। भूम्यनंतरभूम्येकांतरतया। तत्रमंडलेसर्वोनिरवशेषोलोकः स्वार्थपरएव। तथाचोक्तं। सनास्तिपुरुषोलोकेयःश्रियंनाभि
वांछति। अत्राप्तिभग्नमानास्तुनरेंद्रंपर्युपासते। एवंचकस्यचिदपिमित्रत्वंचनविद्यते। एकार्थाभिनिवेशित्वादरित्वमेवसंभा
व्यते। सर्वोपिलोकः स्वार्थपरइतिकुतोमध्यस्थ। ताक्वचिदपि ६८ एतदेवसमर्थयन्नाह। भोगप्राप्तंविकुर्वाणामित्रमप्यपपीड

कोशो कोशहेतुत्वात्

येत। असंतं विघ्नं तं हन्यात् स पापीयान् रिपुर्मतः। भोगो भोगहेतुत्वात् तेन प्राप्तं कोश्योन संवृद्धमित्यर्थः। विकुर्वाणां विकारं गच्छंतं मित्रमा-

च्छपपाद्येत॥ असंतं विघ्नं तं हन्यात् स पापीयान् रिपुर्मतः। विजीगीषोरित्वप्रवृत्तं हन्यात्॥ यस्मात् स विश्वासात् प्रवृत्तः पापीयान्

निकृष्टतरो रिपुः स्मृत इति॥ अमित्रानपि कुर्वीत मित्रानपि कुर्वीत मित्राण्युपचयावहान्। अहिते वर्तमानानि मित्राण्यपि परित्यजेत॥

यानि मित्राणि प्राकृतानि संभवंति तान्यपि मित्राणि कुर्वीत उपचयावहानि अहिते वर्तमानानि मित्राण्यपि परित्यजेदिति प्रतीतं।

वंधुरप्यहिते युक्तः शत्रुस्तं परिवर्जयेत्। अनुरक्तं विरक्तं च मित्रमुपकारियत्॥ वंधुरपि सोदर्योपि अहितो यः स च शत्रुः शत्रु

वत्तं परिवर्जयेत्। अनुरक्तं विरक्तं विरक्तं च तन्मित्रमुपाकरियष्यति प्रतीतं॥ मित्रं विचार्य वहुशो ज्ञातदोषं परित्यजेत्। त्यजन्न भूत

दोषं हि धर्मार्थावुपहंति यः॥ मित्रवदोषवदिति सूचितं वहुशो विचार्यमाणत्वयेण ज्ञातदोषं सुविता दोषं परित्यजेत्। त्यजन्न अथा स

जन्नभूतदोषं हि धर्मार्थावुपहंति हि विजीगीषुरभूतदोषपरित्यागेन धर्मार्थौ उपहंति॥ मित्रसाध्यमश्वार्थस्तत्सागे स्वयहस्त

तएव॥ स्वैरी वगुणान्वेषी भवेत् सर्वत्र सदा॥ स्वयं ज्ञातेषु दोषेषु तस्यैते दंडपात्तैर्न विजीगीषुः स्वयमेव दोषगुणान्वेषी भवेत्

स्सर्वत्रसर्वदाऽन्येषप्रतीतं। नस्वचित्तानततस्तेनकोपं कुर्यात्कथंचन। भुजंगमिवमन्यंते निर्दोषं क्रोधनं जनाः। अत्रव्याख्याः स्वसुगमाः। ७४
।मित्राणामंतरं विद्यात् मध्यज्यायः कनीयसां मध्यज्यायः कनीयांसि मित्राण्यपि पृथक् पृथक्। ज्यायः कर्मोपकारेण कर्मोपि च पृथक् पृथक्।
ज्यायो मध्यमकनीयसां मित्राणामंतरं विद्यात् जानीयात् केन। एषां कर्मणोपकारेणेत्यर्थः। मध्यज्यायः कनीयांसि मित्राण्यपि
पृथक् पृथक् ज्यायः कर्मोपकारलक्षणं। यत्करोति तत् ज्यायो मित्रं। मध्यमोपकारलक्षणं यत्करोति तन्मध्यमं मित्रं कनीयः कर्म-
योगात् कनीयः इति। न हि मिथ्याभियुंजीत शृणुयद्वापितद्द्विधं। मित्रभेदं च कुर्युर्ये तान्समस्तान्परित्यजेत्। पिशुनवचनानि मिथ्या
षं न्यौसुमतं। विजिगीषुणा मित्राणि विषये परप्रयुक्तानि वचनानि परीक्षणीयानीति दर्शयन्नाह। प्रायोगिकं मात्सरिकं माध्यस्थं प-
क्षपातिकं। सोपन्यासं च जानीयात् वचः सानुत्तरं यतः तथा। प्रयोगैर्भेदाय कृतानां तत्र सर्वं प्रायोगिकं यथा। राक्षसमुद्राचाणक्यं
चंद्रयोः कृतकृतकयोर्भेदं कर्तुं राक्षसप्रयुक्तो वैतालिकः। पठति भूषणाद्युपभोगेन प्रभुर्भवति न प्रभुः। परैरपरिभूताज्ञः स्वमि-
व प्रभुः मन्यते। इत्यादि प्रायोगिकं वचनं। मात्सरिकं मितिमसरभवं यथा। तत्रैव चाणक्यः। कथय एष चंद्रगुप्तमभिभवितुमिच्छ

ति।माध्यस्थ्ये इति इच्छाद्वेषरहितं यथा तत्रैव चाणाक्यः परवचनमाकर्ण्य नूनं सुहृत्तमः नह्यनात्मसदृशेषु राक्षसः।कलत्रं न्यासीकरि
ष्यतीति पक्षयातिक्रमिति।पक्षयातेन प्रयुक्तं तथा।तत्रैव वरेण सर्पता राक्षसेनाङ्कितां मुद्रां आंगुल्यां निवेश्य चाणाक्येन मनः
स्यैवोक्तं।ननु वक्तव्यं राक्षस एवास्माकमंगुलिप्रणयी संवृत्त इति राक्षसपक्षपातवचनमिदमिति।सोपन्यासमिति यस्मिन्वच
चसि स्थितस्यापर्यालोचसमीपो साहनृपादन्यो ऽन्यस्य तेन स उपन्यासः।यथा तत्रैव चाणाक्यः।भो श्रेष्ठिन् निपतासर्वस्य सर्वं धवदा
मः।किं पाणाहि आख्याया यथा अणुचिदोंत्रवयोरोसहि अवस्थपरिवादिरितं दुःखमुत्सादेति।ताविधषेवनतत्।वचिवा भूमिग
स्य — सामिचाणाक्यः।भो श्रेष्ठिन् उपचितमेवेदं अस्मद्विधैः सहस्तदुपवि न्नपतामासनएव स्वगतदासः स्वर्गतं परिरिचा
क्रमणेवाकिपि।एवंविध उपक्षेपठयन्यास उच्यते।सानुनायं तथेति।अत्रानुनायः पश्चात्तापः यथा तत्रैव राक्षसनाम्नाम
ह्नसप्राकार — — — नरासनधरैः क्षिप्रपरिक्षिप्यतां।द्वारेषु निरादैः परद्विपघटाभेदक्षमैः स्थीयतां।मुक्तामृत्युभयं प्रह
र्तुं मुरसा नात्रो वले दुर्वलेने निर्यातु मया सहैकं तमसो यद्वामदभीष्टं यन्नाः चिरात्तः अमात्यगुप्तमिदं वर्ण्यते राक्षसलज्जं

कथंरतमिदं। परातस्मानुन्नायंवचइस्येतत्सर्वंज्ञानीयात्॥ विजीगीषुरितिविजीगीषोः मित्रविषयेइतमभिधातुमाह। प्रकाशापसग्रहणं
नकुर्यात्सुहृत्सुस्वयं। अन्योन्यमत्सरंचैषांस्वयमेवाशुधारयेत्॥ सुहृदांमित्राणांमध्येकस्यचिदपिमित्रविशेषस्यप्रकाशापस
ग्रहणंनकुर्याद्धिविजीगीषुःस्वयमन्योन्यमत्सरंचैषांस्वयमेवाशुधारयेदितिप्रतीतंकार्यस्यहिगरीयस्त्वात्नीचानामपि[illegible]कालंविद्वान्सतो
[illegible]अपिदोषान्प्रछाद्यगुणानेवप्रतीवदेत्॥ कार्यंपृथिवीलालनपालनंतस्यैवगरीयस्त्वात्। नीचानामपिमित्रविशेषाणां
कालवित्। यस्मिन्कालेमित्रसाध्यंकार्यमुपस्थितंभवति। तत्रसतोपिदोषान्प्रछाद्यगुणानयासन्नेवदेन्मित्राणामपिवाकवे
षः। प्रायोमित्राणिकुर्वीतसर्वावस्थानिभूपतिः। बहुमित्रोहिकुर्वीतवशेस्थापयितुंरिपून्॥ प्रायोवाहुल्येनमित्राणिसर्वाव
स्थान्यपिमध्यमान्यवराण्यपिम्लेछआटविकश्चिविरपुलिंदपतीनपिकुर्वीतभूपतिः शेषंप्रतीतंमित्रप्रशंसामाह। नतत्र
तिष्ठतिभ्रातानचतान्योपिवाजनः। पुंसामापत्प्रतीकारेसन्मित्रंयत्रतिष्ठति। इतिप्रतीतं॥ मंडलवृत्तिमभिधातुमाह॥ मित्रोदासी
नरिपवएतन्मात्रंतुमंडलं। सम्यक्कृत्वाधनमेतेतेषामितिमंडलशोधनं। व्याख्यामुपगमा। उपसंहरन्नाह॥ इतिस्मराजानयवर्सेना

व

23

व्रजन्समुद्यमी मंडलशुद्धिमाचरन्। विराजते साधुविशुद्धमंडलः शरत्सु नीव प्रतिनंदयन्प्रजाः॥ इति सुगमं॥ अस्य व्याख्यानं॥ ॥
इति कामंदकीये नीतिसारे टीकायां उपाध्यायनिरपेक्षायां मंडलयोनिरष्टमः सर्गः॥ ॥ अनंतरोक्तक्रमेण विशुद्धमंडलो वि
जिगीषुर्षाड्गुण्यप्रयोगे योग्यो भवति। तत्र पूर्वं पठितस्य संधिप्रयोगं दर्शयन्न् सेधिकर्मणो वस्थामेव तावदाह। वलवद्विगृहीतः सन्
नृपोऽनन्यप्रतिक्रियः। आपन्नः संधिमन्विच्छन् कुर्वीत कालयापनं॥ वलवता शत्रुणा समुचितशक्तित्रयेण विगृहीतः सन्
नृपो विजिगीषुरनन्यप्रतिक्रियो दुर्गमित्रादिप्रतिक्रियारहितो हीयमानश्चासमर्थः। अत एवापन्नः संधिमन्विच्छेत् कुर्वाणः का
लयापनं कुर्वाण इति। वाङ्मात्रेणैव संधिमन्विच्छेत्। कर्मणा न कालयापन्यं कुर्वाण कदाचित्कालयापनाभियोक्तुर्व्य
सने सति विग्रहस्यावसरस्यादिति अभिप्रायः॥ षोडश विधसंधिमुपदेष्टुमाह। कपाल उपहारश्च संतानः संगतस्तथा। उपन्यास
प्रतीकारः संयोगः पुरुषांतरः। अदृष्टनरश्चादिष्ट आत्मामिष उपग्रहः। परिक्रयस्तथोच्छिन्नस्तथा च परदूषणः। स्कंधोपनेयः संधिश्च
षोडशः परिकीर्तितौ॥ द्विरष्टविधमिमं प्राहुः संप्रदानाद्भवति य उपहारः स उच्यते। घटकपालयोरेव विश्लिष्टयोरारिविजीषोः स

इति षोडशकं प्राहुः संधिं संधिविचक्षणाः॥ [illegible]
कपालसन्धिर्विज्ञेयः केवलं समसन्धितः

त्तिसाम्ये कोशदण्डाद्युपनतिं विनैव केवलं समसंधिरित्युच्यते। यथा घटकपालयोर्भंगप्रदेशो द्वितीयकपाले श्लेषिते बहिर्
भिन्न एव घटो दृश्यते। न च निरंतरसंश्लेषस्तथा सन्धत्र यथा दिसंधिकर्मरहितत्वात् वा मात्रेण यते स कपालसंधिरुच्यते य
थेष्टं व्यभिचारात् तथा संप्रदानात् कोशदण्डादीनां भवति यः संधिः स उपहार उच्यते। तथा संतानसंधिर्विज्ञेयो वारिकाद्यान
पूर्वकः। साक्षि संगतसंधिस्तु मैत्रीपूर्वमुदाहृतः॥ संगते मैत्री। संगतं संधिर्विशिष्टः। सुवर्णसंधिः कांचनसंधिः। इति द्वयोप
न्नाह॥ यावदायुः प्रमाणं तु समानार्थप्रयोजनः। संगतः संधिरेव हि प्रकृष्टत्वात् सुवर्णवत्॥ यावदायुः प्रमाणमविशिष्टो वा।
आयुषः प्रमाणं यत् द्वयोरपि समान एवार्थः। कोशस्त्वदीयो मदीयो गदीय इति विभक्तिर्न प्रयोजनानि धर्मार्थकामविषयाणि
तान्यपि समानानि प्रयोजनविषये विभक्तिर्नास्तीत्यर्थः। संपत्तौ हस्त्यादिकारयोः श्लेषिक्तिकरे यो न भिद्यत इति विपत्तौ च व्यसने स
संगत एव संधिस्तु विशेषेण प्रशिष्टप्रकृष्टत्वात्। असंभ्रमत्वात् सुवर्णवत् यथा सुवर्णाद्भूतसंधानं विशिष्टं न भवति। यावदायुः
सुवर्णाभरणादेः तद्द्वयमपि संधेरिति॥ अपरैः संधिकुशलैः कांचनमुदाहृतः। संपत्तौ च विपत्तौ च कारणौ यो न भिद्यत इति प्रतीतं।

मयास्योपकृतं पूर्वमयमप्येष करोति यः ॥ इति यः क्रियते संधिः प्रतीकारस्स उच्यते ॥१०॥

भव्यामेकार्थसिद्धिं च समुद्दिश्य क्रियेत यः । स उपन्यासकुशलैरुपन्यास उदाहृतः । शुभामेकार्थसिद्धिं च सकस्य च भव्यादर्थस्य या सि-
द्धिस्त्वं पातव्यं गत्वा तद्भूमिं गृहाणाहमपि स्वयं यातव्यं गत्वा तद्भूमिं गृहीष्यामीव उपन्यस्य च यः संधिः प्रतीकारः स उच्यते । पूर्वमे-
वं कोप्यणादिभिरुपकृतं अनंतरं च मित्रादिकृतो विरोधः । संपन्नस्ततश्च पुनः संधौ कृते ममापि प्रत्युपकारं करिष्यति । यः क्रियते सं-
धिः प्रत्युपकारसंधिरित्युच्यते । उपकारं करोम्यस्य ममाप्येष करिष्यति । अयं चापि प्रतीकारो रामसुग्रीवयोरिव । अस्य साहाय्या-
र्थं उपकारं करोमि पश्चान्ममापि प्रत्युपकारं करिष्यति । अयं चापि प्रकारो रामसुग्रीवयोरिव रामेण वालिहननात्सुग्रीवस्य
उपकारः कृतः । सुग्रीवेणापि साहाय्यं कृत्वा रावणवधः संपादितः । एकार्थां सम्यगुद्दिश्य यात्रां यत्र हि गच्छतः । सुसंहितप्रयाणस्तु
संयुक्तः ~~संयुक्तं~~ संधिरुच्यते । एकमेवार्थं यात्रां यत्र हि गच्छतः । संहितप्रयाणापूर्वमविश्वाससंयुक्तं संधिप्रयोग उच्यते । आ-
वयोर्योधमुख्याभ्यामसद्ध्यार्थं साध्यैताम् [illegible]ति । यस्मिन्पणश्च क्रियते स संधिः पुरुषान्तरः । विजिगीषुर्दंडोपनतं प्रत्याह । आवयोर्यो-
धमुख्याभ्यां स्वप्रतिबद्धसैन्यसहिताभ्यामस्वार्थो भूमिलाभादिकः साध्यतामिति यस्मिन्पणः क्रियते संधिः पुरुषान्तरमहालाभो

हिविज्ञेयपुरुषसमागमोराज्ञामितिवचनात्दंडोपनतःस्वात्मीयपुरुषांतरेणकार्यंसाधयतीति॥[१४]त्वयैकेनमदीयोऽर्थःसंप्रसा
ध्यस्त्वसाविति।यत्रशत्रुःपणंकुर्यात्सोऽदृष्टपुरुषःस्मृतइतिविजिगीषोःपुरुषंकश्चिन्नदृश्यतइति॥[१५]॥यत्रभूम्येकदेशेनपणे
नरिपुरूर्जितः।संधीयतेसंधिविद्भिरादिष्टसंधिरुच्यते[१६]।स्वसैन्येनतुसंधानमात्मामिषइतिस्मृतः।क्रियतेप्राणरक्षार्थंसर्वदा
नमुपग्रहः[१७]।संहितेनसौम्येनप्रेषणंसर्वत्रकर्तव्यमिति।संधानंयत्रआत्मा।मिषःसंधिरात्मामिषोवामिषीकृतइतिउदाहृतः।क्रि
यते।प्राणरक्षार्थसर्वदानात्सकलभूमिहिरण्यादियानान्युपग्रहः।सर्वदानेनानुचितमुपगृहीतमिति॥[१८]कोशांशेनार्धकुप्ये
नसर्वकोशेनवापुनः।शेषप्रकृतिरक्ष्यार्थपरिक्रयउदाहृतः॥तथाकोशांशेनार्धकुप्येनोक्तलक्षणेनतेनाद्यकोशांशेन नेत्सादिकुप्ये
तृतीयचतुर्थेनवा।पुनःशेषप्रकृतयःकोशावर्याःतद्रक्षार्थंयद्दिक्रयउदाहृतः।कोशेनशेषाःप्रकृताःप्रकृता[१९]ताइति॥भुवां
सारवतीनांचदानादुच्छिन्नउच्यते॥सारभूमिदानंतुउच्छेदहेतुरितिसर्वभूम्युत्थितफलादानेनपरदूषणोनभवस्तेतत्राव
फलंस्वयोपद्रवःहृतइतिपरीतद्रूष्यतइति॥[२०]परिच्छिन्नंफलंयत्रस्कंधंस्कंधेनजायते॥स्कंधोपनेयंतंप्राहुःसंधिंसंधिविदोज

सर्वभूम्युत्थितफलादानेपरिभूषणः[२०]

२५

नाः॥ तथापरिच्छिन्नं बहुसंख्यं फलं हिरण्यादि यत्र तेन स्कंधं स्कंधेन दीयते इत्यतः कालेनैतत्संख्यं देयमिति यो निबंधः। व्यवस्थो-
च्यते स्कंधोपनेयं तं प्राहुः संधिं संधिविदो जनाः॥ संभवतः संधिविशेषानभिधाय पुनश्चिह्नसंधिलक्षणं येषां तानभिधातुमाह।
परस्परोपकारश्च मैत्रं संबंधकस्तथा। उपहारश्च विज्ञेयाश्चत्वारस्ते च संधयः॥२२॥ परस्परोपकारश्चेत्यादि परस्परोपकारो रा-
मसुग्रीवयोरिव यो मैत्रश्च मैत्रत्वेनैव स्निग्धरूपचरितेन यो भवति। स संबंधजस्तथा। घटिकादानपूर्वक इत्यर्थः। उपहारश्च य-
त्र कोशाद्याह्रियते विज्ञेयाश्चत्वारस्त्वेव संधयो येषु विश्वे शाप्रांकान वियते इत्यर्थः॥२२॥ एक एवोपहारस्तु संधिरेतन्मतं हि नः।
उपहारस्य भेदास्तु सर्वेन्ये मैत्रवर्जिताः॥२३॥ उपहार एवैकः संधिरभिमतोस्माकं यस्मादुपहारभेदा एवान्ये परस्परोपकारोपि
वस्त्रालंकारादिकस्योपहरणमास्ति संबंधजः कारिकादेरुपहरणमस्ति केवलं मित्रं वर्जयित्वा शेषाः उपहारभेदा एवं॥२३॥ अभि-
योक्ता बली यस्मादित्यादि॥ अभियोक्ता बली यस्मात् अलब्ध्वा न निवर्तते। उपहारादृते तस्मात् संधिरन्यो न विद्यते॥२४॥ अभि-
योक्ता विजिगीषुर्बली राज्यादिसंपूर्णः। यस्मादलब्ध्वा न निवर्तते। तेन प्रार्थितमुपहरणीयमेव तस्मादुपहारादृते न संधि

रेवन विद्यते संधिलक्षणानामभायाश्चिति[२७]। असंधेयमभिधातुमेवव्याचष्टे। वालो वृद्धो दीर्घरोगी ज्ञातिबहिःकृतः। भीरुको भीरुकज
नो लुब्धो लुब्धजनस्तथा[२५]। विरक्तप्रकृतिश्चैव विषयेष्वतिसक्तिमान्। अनेकचित्तमन्त्रश्च देवब्राह्मणनिंदकः[२६]। दैवोपहतकश्चैव दै
वचिंतक एव च। दुर्भिक्षव्यसनी चैव बलव्यसनसंकुलः[२७]। अदेशस्थो बहुरिपुर्युक्तः कालेन यश्च न। सत्यधर्मव्यपेतश्च विंशतिः पुरु
षास्त्वमी[२८]। एभिः संधिं न कुर्वीत विगृह्णीयात्तु केवलं। एते विगृह्यमाणा ध्रुवं यांति रिपोर्वशम्[२९]। असंधेयमत्वे हेतुमभिधातुमाह। वालस्य
हि प्रधानत्वान्न लोको योद्धुमिच्छति। योद्धुं स्वपमशक्तस्य परार्थे को हि वर्धते[३०]। उत्साहशक्तिहीनत्वात् वृद्धो दीर्घामयस्तथा। स्वै
रेव परिभूयेते द्वावप्येतावसंशयं[३१]। उत्साहोत्त्रायोगः। तच्छक्तिहीनत्वात् वृद्धो विग्रहासमर्थः। तस्माद्वृद्धसमानत्वेन दीर्घामयो
दीर्घव्याधिरित्यत्र तयैवोपलक्षणो। येतदुर्हिष्टत्वात्। संप्रतीतीं। सुखोच्छेद्यो हि भवति सर्वज्ञातिबहिःकृतः। त एवैनं विनिघ्न
ति ज्ञातमस्वात्मसात्कृताः[३२]। भयात्सुखोच्छेद्यो हीत्यादि। सुखेनैवोच्छेद्यो हि सर्वैरेव ज्ञातिभिर्बहिष्कृतस्त एवैनं ज्ञातयः परित्यक्तः
विनिघ्नंति विजीगीषुणा वात्मसात्कृताः इत्ययमस्यार्थः[३३]। भीरुर्युद्धपरित्यागात् क्षिप्रमेव विनश्यति। धीरो(?)प्यधीतपुरुषैः संग्रा

मेते र्विमु च्यंते। अतो भीरुकजनो प्यसंधेयः॥ लुब्धस्यासविभागित्वात्‌न युध्यंते नुजीविनः। लुब्धानुजीवकै रेवदानभिन्नै र्विहन्यते। लुब्ध
स्यासंवृतेरभावात्‌ लुब्धानुजीविकै रेवानुजीविभिर्विजीषुणा दानेन भिन्नैर्विहन्यते। संसज्यते प्रकृतिभिर्विरक्तप्रकृतिर्युधि। सुखाभियो
ज्यो भवति विषयेष्वतिसक्तिमान्। स तथा संसज्यते प्रकृतिभिर्विरक्तप्रकृतिर्युधीति प्रतीतं। तथा सुखाभियोज्यो भवति विषयेष्वति
मद्यद्यूतादिष्वतिसक्तिमान्। अनुरागवान्‌ अनेकचित्रमंत्रस्तु द्वेष्यो भवति मंत्रिणां। अनवस्थितचित्तत्वात्‌ कार्येते। सत्ये
ष्यते। इति प्रतीतं। सदा धर्मवलीयस्त्वात्‌ देवब्राह्मणनिंदकः। अत्री यते स्वयं चैव दैवोपहतकस्तथा। सदा विशीर्यते विनश्य
ति स्वयं स्यैव विजीगीषुणा नुनाभियुक्तो हि निंदाप्रभवपापप्रभावात्‌ त्वथा दैवोपहतको पि जन्मांतरको पि जन्मांतरकृतनयायां
दैवस्वयमेव विशीर्यते। संपत्तेश्च विपत्तेश्च दैवहि कारणं। इति दैवपरो ध्यायन्नात्मना न विचेष्टते। संपत्तौ च॰॥ न पुरुषं पुरुषकारणं
इति दैवं ध्यायन्‌ आत्मना न विचेष्टते। यथोपनतेपि भोजने दोषपरो॰ विपद्यत एवं तथा। दुर्भिक्ष्यव्यसनी चैव स्वयमेवावः
सीदति। वलव्यसनयुक्तस्य योद्धुं शक्तिर्न जायते। दुर्भिक्ष्य॰ भोजनाभावात्‌ वलव्यसनानि अमानितादीनि रतेन तथा। अदेशस्थो

संसज्यते प्रकृतिभिरिति प्रतीतम् ३५

दैवमे ३

२६

२६

हि रिपुणा स्वस्वकेनाभिनीयते। ग्राहोल्पीयावपि जलेगनेंद्रमपकर्षति। इति प्रतीतं तथा। वद्धमित्रसमं त्रस्तः श्येनमध्ये कयोतवत्। येनैवग

च्छति यथा तेनैवाशु विनश्यति इति प्रतीतं तथा। सत्यधर्मव्ययेतेन संदध्यात् कदाचन। सुसंधितोप्यसाधुत्वात् अचिराद्याति विक्रियां॥ ५३

एभिर्विंशतिसंख्यैः शत्रुभिः सह संधिर्न कार्यो यस्मात् स्वयमेव विनश्यंतीति। आदरात्संधेयानभिधातुमाह। सत्यार्यधार्मिकानार्यो

भ्रातृसंघातवान्बली। अनेकविजयी चेति संधेयाः सप्तपार्थिवाः। सत्यानुपालमन सत्यसंधितो नैव विक्रिया। प्राणात्ययेपि असत्कर्म

यदो [illegible] यात्सधार्यनां धार्मिकश्चाभियुक्तस्य सर्व एव हि विबुध्यते। प्रजानुरागधर्माभ्यां दुःखोच्छेद्यो हि धार्मिक इति। संधिकार्योहनार्ये

पासंप्राप्योच्छेदयेद्विषः। परशुरामस्य मूलेषु पिक्षत्रियास्तुच्छायंतह्वालतरेषु पिनतिष्टंति। तानुप्येकविंशतिवारान् उच्छादितवा

निसर्थः। अनार्यताचन्नास्त्रेदुष्टस्यैव वधोभिहितः। तेन च दुष्टानां वहूनां व इति तथा। संघातवान् यथा वेणुर्निविडैः कंटकैर्वृतः। न

त्राकाते समुच्छेत्तुं भ्रातृसंघातवांस्तथा। इति प्रतीतं। सभाक्रांतस्य वलिना सर्वयन्नवंतोपिहि। हरिणास्येव सिंहेन त्रातारं नेह विद्यते

। अयोवलीयान् संधेय एव सर्वथा प्रतीतं। इष्टदायच्छमानोपि सिंहो मत्तमिव द्विपं। निहंति वलवांस्तस्मात् संधेयस्त्रिविमिच्छतो॥

इतिप्रतीतं। वलिनासहयोद्धव्यमितिनास्तिनिदर्शनं। प्रतिवातंनहिघनःकदाचिदुपसर्पति। एवंवृक्षोपिवलिनःसन्मुखंस्यात्तम
ग्नक्रस्यार्थेः। वलीपसिमणामतांकालेविक्रमनामपि। संपदोनागच्छंतिप्रतीपमिवनिम्नगा। इतिप्रतीतं। जमदग्निसुतस्येवःसर्वत्रस
र्वदाः। अनेकयुद्धजयिनःप्रतापादेवभज्यते॥ इदमपिप्रतीतं। अनेकयुद्धविजयीसंधानंयस्यगच्छति। तत्प्रतापेनतस्याशुवशमायां
तीहविद्विषः। इतिप्रतीतं। नजात्वनुगच्छेद्विश्वासंसंहितोपिहिवुद्धिमान्। अद्रोहेसमयंकृत्वाहत्वमिंद्रःपुरावधीत्। इतिप्रतीतं। विकारं
यातिपुत्रोपिराज्यालीढस्तथापिता। तल्लोकवृत्तान्नृपतेरन्यद्वृत्तंप्रचक्षते। राज्यंक्ष्मालंकृतः। तस्माल्लोकवृत्तान्नृपतेरन्यद्वृ
त्तंप्रचक्षतेइतिस्मृतिकाराः। वलवान्यत्रसंधिंनेच्छेत्तत्रविधेयमाह। अभियुक्तोवलवतादुर्गेतिष्ठन्प्रयत्नवान्हतरक्षाति
त्रायस्तस्मादपिप्रायोवलीप्रेत्तरस्याक्षमं कुर्वीतात्मविमुक्तयेदुर्गोपरोधी। विमुक्तयर्यमितिवलीयस्तराभावेविधेयमभिधातुमा
ह। स्वराजतोसाहसुहृदीक्ष्यविगृह्णीयान्महत्तरं। केसरीवद्विपमितिभारद्वाजःप्रभाषते। स्वकीयःशक्तयःप्रभुमंत्रोत्साहलक्षणाः
उत्साहशक्तित्वेनयष्ठितोपिपुनरुत्पादीयते। त्रयोर्यस्याधिकारप्रदर्शनार्थंतमुद्वीक्ष्यात्मनोविगृह्णीयात्महत्तरंरज्यायांसंदेह

सरीवद्धियं। केसरी द्विपापेक्षया महत्तरो ऽप्यपेक्षया महत्तरो न भवति। किंतु ग्रामेणोत्साहयुक्तः केसरी स्वमात्मानमुद्वीक्ष्य महत्तरमपि

विग्रहं करोत्येवेति भारद्वाजो महर्षिः प्रभाषते। मतांतरदर्शनं च गसंतराभावे ज्यायस्य विग्रहो नास्त्येवेति। एतदेव दृष्टांतेनाह। एको

ऽपि सिंहः साहस्रं यूथं हंति निर्नाशं त्रियामामप्नोति विनाशयति। तस्मात्सिंहमिवोदात्तमात्मानं वीक्ष्य ज्यायसां प्रति संयतेनान्यथेति॥ [६२] अ

त्र गुणान्दर्शयन्नाह। ज्यायांसमल्पसैन्यस्य बलाद्धि क्रम्य निघ्नतः। प्रतापसिद्धाः सर्वत्र भवंति रिपवोऽपरे॥ [६३] ज्यायांसं महता ऽत्यधिकमल्पसै

न्यस्य उत्साहवतो ऽत्यधिकस्य बलाद्धि क्रम्य निघ्नतो व्यापादयतः। प्रतापेनैव सिद्धा भवंति रिपवो परे विग्रहं विनैव स्वयं। अतिकग त्वि

कै विग्रहमभिधाय प्रस्तुतसंधिमेवाभिधातुमाह। संधिमिच्छेत्समेनापि संदिग्धो विजयो युधि। न हि संशयितं कुर्यादित्युवाच बृहस्प

तिः॥ [६४] न केवलं ज्यायसा समेनापि समर्थः शक्तिनापि संधिमिच्छेत्। कुत इत्याह। यतः संदिग्धो विजयो युधि। यतो हीनैरपि ज्यायांसो जिता

दृश्यंत इति सांत्रापि कं कार्यं विवेकी कुर्यादिति बृहस्पतिरुवाच। निःसंदेहे प्रवृत्तिर्नीतिविदामिष्यत इति तथा॥ आसंप्रवृद्धेरपि वृद्धि

कामः समेन संधानमितोपगच्छेत्। अपक्वयोर्वा घटयोरिवत्र परस्परं भेदो ममसंनिपातः॥ [६६] आसंप्रवृद्धेरपि सम्यक्प्रवृद्धस्य वृद्धिः।

साभवति। यावत् अभिवृद्धिकामो विजीगीषुः समेन संधानमिच्छन्सोऽयं तमगच्छेत्। अपक्रमो रिपुघटमोः समसंनिपातो नोऽन्यभेदो भ
28 वति। एतदेव दर्शयन्नाह। देविनाशो भवतितया च सुंदोपसुंदाख्यौ दानवावन्यावध्यौ इति लोत्तमाभिलाषात् जातविरोधौ सोऽद्ध्यौ स
मवीर्यौ हतौ बुधा इति ॥६४॥ न केवलं समो हीनोऽपि संधेय इति दर्शयन्नाह। पिहीनोऽपि संधेयो व्यसने रिपुरागतः। एतदुनोति हि मनः स्तोयः
विन्दुरिवक्षते ॥६५॥ हि यस्मान्मनो दुनोति। क्षते स्तोयविन्दुरिव एवं व्यसने रिपुहीनोऽपि संधेयस्तथा ॥ न संधीगच्छेद्दीनश्चेत् न हेतुरसंधा
यः। तस्य विश्रंभमात्र लक्ष्यप्रहरं स्तत्रानिष्ठुरं ॥६६॥ यदि हीनोऽपि संधिं नेच्छेत्। तत्ता लक्षितः कश्चिद्धेतुः कारणमसंधायं वियते दूसमुपी
पतेरातिविशेषः। तत्र सामादिभिस्तथा विधेयं। यथा विश्रंभो भवति विश्रंभं च लक्ष्यप्रहरेदिति निष्ठुरां यथा समूलो नश्यतीति। सं
धापवृत्ते हीनतरसंधिमभिधातुमाह। बलीयसाऽतिसंधायतं मं विदध्यात् मपल्लवानां तथासाचनुगंतव्यो यथा विश्रंभमाप्नुयात् ॥६७॥
ज्यापसादंगादिभिरूपनतः संधिकृत्वा। तमनुप्रविश्य आनुजीविवृत्तसादिना प्रयलवानतिसंधेयो भूत्वा तथासावाश्रितोऽनुगंतव्यः
सेवनीयो यथा विश्रंभमाप्नुयादिति ॥ विश्रंभनीतिमुख्युक्तो निगूढाकारचेष्टितः। प्रियाण्येवाभिभाषेत पक्कार्यमेवर्तत ॥६८॥ लब्धवि

त्व

श्रंभो निसमुत्कः सावधानो निगूढाकारचेष्टितः। कृतेंगिताकारविपर्यासमाचरन् हि प्राप्तो ध्रुतिवचनात् प्रियाण्यपि वाभिभाषेतान्
यजीवेत्याहिकानि परिलकार्यं विनाश्यादिकं तत्कार्यं मवश्यं कर्त्तव्यमेवतथा विश्रंभात्प्रियतामेव विश्रंभाकार्यमिच्छति विश्रंभे
णाहिदेवेंद्रौ दितेर्गर्भमन्यातयत्। विश्रंभाद्धि विश्वासात् प्रियतां वल्लभत्वमेति विश्रंभात्कार्यं तद्वधादिकं गच्छति। विश्रंभेण देवेंद्रौ दितेग
र्भं दौ स्वजनन्यागर्भमयातयत्। प्रतिवलो द्वैसो भविष्यतीति। भूयोपि न्यायस्याभियोक्तुरभिधेयमाह। युवराजेन संधाय प्रधानपु
रुषेण च। अंतः प्रकोपं जनयेत् अभियोक्ता स्थिरात्मनः। अभियोक्ता युवराजेन प्रधानपुरुषेण वामंत्रिपुरोहितसेनापत्यादिना सं
धाय गूढतरं संधिं कृत्वा अंतः प्रकोपं जनयेत्। परस्परविरोधं कुर्यादभियोक्ता स्थिरात्मनोपि तथा। आर्थोत्सर्गेण महता लेखैश्चाप्य
र्थसंहितैः। प्रधानपुरुषस्येह कारयेदर्थदूषणं। अर्थस्य हिरण्यादेः कृत्स्नगोणदानेन महता प्रचुरेण लेखैश्चाप्यर्थसंहितैः मुद्राक्ष
रोक्तन्यायेन भेदप्रतिपादकार्थसहितैः प्रधानपुरुषस्य सेनापत्यादेर्दूषणं कुर्यात्। दूषणफलमभिधातुमाह। दूषिते हि महामात्ये रि
पुरुग्रो विधीमता॥ स्वपक्षे यास्य विश्वासमित्यं मूतश्च निष्प्रियः। दूषिते संपादिते दोषे महामात्ये सेनापत्यादिके रिपुरुग्रोपि वलवत्तरो

पिकृते विधीमता विजीगीषुणा स्वपक्षे यो विश्वासमिच्छं भृतश्च निःक्रियः। अभियोगः क्रियारहितो भवती सर्थः। अरेरमात्यान् संधाय एतदा
रंभं त्वामं नयत् भिषक् भेदेन वा त्वामभियोक्तारं सदानेन विषमयोगेण वा साधयेत्। धप्राज्ञस्तथा। अरेः सर्वप्रयत्नेन पश्चात्कोपं प्र
कल्पयेत्। पश्चात्कोपमथातिष्ठन्नुपसृत्य प्रधर्षयेत्। अरेरभियोक्तुः सर्वप्रयत्नेनासारे पाप पश्चात्कोपस्थानी पविषयेवा कोपं कलहं क
ल्पयेत्। निःपादयेत्। तस्मात्कोपमथातिष्ठन् विजीगीषुमनुसृत्य प्रधर्षयेत् हन्यादिति। तद्देशाद्धृतसंवासैश्चारैर्नैमित्तकैररेः। जपो
ढव्यसनादेशां। कारयेत सिद्धलक्षणैः। अरेर्यो देशाद्धृतसंवासैस्तैर्हि प्रासपिका भवंति। चारैर्गूढपुरुषैस्तथा नैमित्तिकैर्ज्योतिषिक
व्यंजनैररेरभियोक्तुरुत्सातस्वचित्तं जपोढव्यसनादेशां महाभयस्वरूपायदं अदेशां कारयेत्। अभियोगत्याजनार्थं भूयोऽपि निषेधेद
र्शयन्नाह। क्षयव्ययप्रयासवधादिदोषव्ययेक्षया वीक्षितसाधुवृत्तयः। कामं नृपीडामपि का विदिध्येत। नविग्रहं प्रस्त्रभवा हि दोषा॥ प्रधान
पुरुषादिवधक्षयः। धान्यहिरण्यादीनामुपक्षयो व्ययः। प्रयाणे त्रीतोस्वर्षर्तुः स्वाधे आयासः वधो युद्धे शास्त्रादिना मरणं। आदिशब्दाच्छे
पनिषत्। प्रयोगैरन्यैर्वैकल्पादि एते दोषा विग्रहे भवंतीति यानपेक्ष्य यानया विक्षितसाधुवृत्तयः। विक्षितं साधुवृत्तं निरूपायं विजीषुणा सत

थाकामतो आगतिः। कागतिः पक्षेकामन्नाद्प्रयोगः। परंपीडामपिकोत्रादि प्रव्रतिपीडामपिकांक्षिदिच्छेन्नेविग्रहंहियस्मात्तभवाःसर्वेपि
स्यादिदोषास्तदेवस्पष्टयन्नाह। ~~कलत्रवंन्माह~~। कलत्रमात्मासुहृदोधना[illegible]निहयाभवंतिहति। प्रथमाध्यात्। मुहुर्मुहुश्चाकुलितानिता
नितस्मान्नविद्वानतिविग्रहीस्यात्। कलनं। प्राणवल्लभं। स्त्रीजनआत्मासकलत्राणस्वसंस्कृतस्वकाय। सुहृदोबांधवामित्राणिचधनानि
रत्नादीनिचतुर्विधानिहयाभवंति। निरर्थकानिजायंते। शास्त्रप्रहाररैर्गतजीवितस्यतत्कार्यासंपादनात्। निमेषमात्रादेवमुहुर्मुहुश्चवि
ग्रहे। सस्राकुलितानिविग्रहभयेनभवति। तानिकलत्रादीनितस्मात्कारणान्नविद्वान्नितिशास्त्रविदिति। विग्रहोविरोधकारस्यान्नचन्या
यतःसमायानविग्रहंपरिहरेदित्यर्थः। अन्यायेअसंग्रामेसएवदोषदर्शयन्नाह। सुहृनंतथाराज्यमात्मानंकीर्तिमेवच। युधिसंदेह
लोलास्थंकोहिकुर्याद्वालिशः। इतिप्रतीतं। समीप्याभियोक्तासंदेहएवेतिदर्शयन्नाह। साम्नाप्रदानेनैसंस्तंभयेसाधामियुज्यमानः विभेदनेन
संधिसुरारात्समसैव्यचक्रंसामंतमांनमयेतसंधिं। साम्नासंबंधोपाख्यानादिपंचविधेनतद्यथागुणसंबंधोपाख्यानंपरस्परोपकार
दर्शनंआयतिप्रदर्शनंआत्मोपनिधानमिति। तत्राभिजनहारारकर्मप्रकृतिश्रुतभद्रयादीनांतथास्मिन्नेवप्रकृतेइदमावयोर्भविष्य

नीसान्त्वाञ्जनमापतिदर्शनंतथायन्ममद्रव्यंतद्भवतः स्वहस्तप्रयोज्यमिस्यात्मोपनिधानमित्येवंसाम पंचविधं। तथाप्रदानमर्थोपका
रस्तदपिचतुर्विधमपूर्वदानंगृहीतप्रतिदानंगृहीतानुवर्त्तनंग्राह्यप्रमोक्षइतिभेदनंद्विविधं। त्वांकीजननमभिमर्शनंचभेदइति। कौ
टल्यः। एवंविधोपाययत्रयेपासंस्थापयेदभियोक्तारंविगतामर्षंकृत्वासधीयोजयेत्साधुतुष्टिं यथाभवति अपि युज्यमानो
विगीजीषुः संधिस्तुमंदीभवति। आरात्संनिहितंसामंतंभूम्यनंतरमित्यर्थः। अपांतमागच्छंतमपेतसंधिःसंस्थापयेदितिसंबंधः
संधिमनिच्छति। अभियोक्तरिविधेयमाह। स्वगुप्तिमाधायसुसंहितेनबलेनधीरोविचरन्नरातिं। संतापयेत्। येनससंमतस्तत्से
नसंधानमुपैतितस्तः। स्वगुप्तिमात्मनःसमपरिच्छदस्यरक्षामाधायकृत्वासुसंहतेनाभेदेनैव एकीभूतेनचतुरंगेनसारतरेण
धीरोधैर्यवान्विचरन्विविधंपुरतःपश्चात्सर्वतःस्वरन्विविधासारमचारंकुर्वन् अरातिसंधिमनिच्छंतंसंतापयेद्उद्वेजयेत्।
येनससमंततस्तोभवतीतिशेषः। कस्मात्यस्मात्तप्तंलोहंतप्तेनैवलोहेनसंधानमुपैति। नान्यथेतिदर्शनार्थः। तथाचकौटल्यः। ना
तप्तंलोहंतप्तेनसंधत्तइतिउपसंहरन्नाह। इतिसमैःसंधिविनमाःवभाविरेपूर्वतमामहर्षयः। बलात्मदेनंविनयेन्नरेश्वरः सप्तमी

संधिंखलु१

स्यकार्यंगुरुश्चेतरद्विधाराःसेवमुक्तप्रकारेणसंधिवितमाअतिशयेनसंधिविदःसंधिंवभाषिरेप्रोक्तवंतःपूर्वतमाःशुक्रबृहस्पतिमतयो
महर्षयप्रस्तादाक्रम्यातत्तस्मात्कारणादेतत्संधिमनिच्छुसापरौविनयेद्विरोषेणप्रापयेत्अरिःकारयेदित्सर्थः।समीक्ष्यप्रहृतयादृष्ट्वा
कार्यंगुरुश्चेतरद्ब्रवंविधेति॥ ॥इतिकामंदकीयनीतिसारटीकायांउपाध्यायनिरपेक्षायांसंधिविकल्पोनवमःसर्गः॥९॥ ॥संधिवि
कल्पादनंतरंविग्रहविकल्पमभिधातुंविग्रहकारणान्येवतावदाह।अमर्षोपगृहीतानांमनुसंतप्तचेतसां।परस्परापकारेणपुंसां
भवतिविग्रहः॥इतिप्रतीतं।आत्मनोभ्युदयाकांक्षीपीड्यमानःपरेणवा।देशकालबलोपेतःप्रारभेतेहविग्रहं॥नकेवलममर्षादिकं
विग्रहकारणं।आत्मनोभ्युदयाकांक्षाविसाविद्यतेयस्यसपीड्यमानःपरेणवागसंतराभावेदेशावलेनस्वसैन्यस्यायामानुकूल्येन
तथैवकालवलेनोपेतःप्रारभेते।इतिविग्रहंनान्ययेत्सर्थः।विग्रहेसतिकारणानिअभिधातुमाह।राज्यस्त्रीस्थानदेशानांज्ञानस्यच
धनस्यच।अपहारोमदोमानःपीडावैषयिकीतथा।राज्यंसप्तप्रकृतिकंस्त्रीसीताहिकस्पास्थानंजनपदाधिष्ठानंदेशोराष्ट्रैकदेशः
ज्ञानहेतुत्वादुपाध्यायादयः।धनस्यरत्नादेरेतेषांप्रत्येकमपहारोविग्रहयोनिरितिसंबंधः।तथामदशौर्यादिजनितोदर्पोयथा।

दंभोद्भवस्याउक्तंच। मदोदंर्थोद्भवोनपश्यतिमानोहंकारः अहमपिरावणमयाप्तसीतांसमर्पयामीत्येवंरूपउक्तंच॥ मानाद्रावणःपर
दारानप्रयच्छन्निति। पीडाविशेषपिर्कीनयेतिविषयोजनपदस्तस्यपीडासापिविग्रहयोनिः विषयमूलप्रकृतीनां। ज्ञानार्थदेवधर्मार्णवि
घ्नातोदैवमेवचमित्रार्थाह्यमानश्चतथाबंधुविनाशनं। ज्ञानविघातोज्ञानस्यकारणभूतोयाध्यादिविज्ञातः अर्थविघ्नातोभू
मिहिरण्यमित्ररूपस्यार्थस्यविघातःशक्तिविघातः। प्रभुमंत्रोत्साहशक्तीनांविघातोउत्पत्तौयत्नउत्पन्नानांविनाशः दैवमेवज
न्मांतरंकृतं। शुभाशुभोग्रहदोकल्लालिंगमित्रार्थश्चेतिमित्रसहाय्यादिभवा। अपमानश्चेतिमान्यानाममममानंतथाबंधुविना
शनंविग्रहयोनित्वेनप्रसिद्धमेव। भूतानुग्रहविच्छेदस्तथामंडलदूषणां। एकार्थाभिनिवेशित्वमितिविग्रहयोनयः भूतानुग्रह
विच्छेदइति। एकेनदत्ताभयेनमृगवनेपद्यपरोमृगयायांविचरति। तदपिविग्रहकारणंतथामंडलस्यद्वादशराजकमध्ये
दुष्टस्यापिदुषणांदुष्टत्वापादानं। एकार्थाभिनिवेशित्वएकीभूम्यादिःस्त्र्यादिचायोर्थस्तत्राभिनिवेशित्वंग्रहणाग्रहवधइति
प्रकारः। एवंप्रकारारम्यन्यान्यपिपरवाहस्तेपादयोविग्रहाहेतवोभवंतीतिकारणाभावात्कातर्यावभामन्यमानोविग्रहका

रथानांप्रसन्नानामप्युपक्रमार्थमाह।राज्यलक्ष्मीस्थानदेशानांदानेनमदेश्चाविग्रहस्यउपक्लिष्टैःसम्यक्प्रक्रमणंस्मृतंस्म॥

श

राज्यादीनांमुक्तरूपाणांप्रमादादपहृतानामपिदानेनप्रत्यर्पणेनदमेनोपमेनचविग्रहस्ययुक्तिष्टैरितिप्रक्रमणंस्मृतमिति।प्रती
तं।एतदेवतुविस्तेयंस्वार्थधर्मविघातजेविग्रहेक्रमणमितिसंबंधः।विषयधसंजेतत्रान्तेविषयस्यप्रतिदानांतेनामर्षस्योपक्रमायो
भवतीतितथा।ज्ञानापहारसंभूतेज्ञानशक्तिविघातजे।क्रमस्तदर्थत्यागेनक्षांत्याचोपेक्षणेनच।ज्ञानविघातजंशक्तिविघात
जेचक्रमोविग्रहसेत्योपक्रमात्तदर्थत्यागेनउपध्यायादिपदित्यागेनार्पणेनवाक्षंत्यापहरादेःक्षमयातुज्ञानादुपेक्षणेनवादो
षाद्युद्भावनेनवानवधारणेन।अधर्मद्रोहसंयुक्तेमित्रजातउपेक्षणंमित्रस्याधर्मद्रोहाभ्यांयुक्तंमित्रमप्युपेक्षते।तत्सहायादानंविग्र
होपक्रमायभवति।आत्मवन्मित्रजातेचितिमित्रस्यात्माप्रकृतितद्युक्तःमित्रसंपद्गुणसंपन्नत्व।तथाचकौटल्यः।पितृपैतामह
तिसंबद्धस्यमहद्वैध्यमहल्लघुसमुत्थानमिति।एतद्गुणरूपोमित्रस्यात्मासविद्यतेयस्यतदात्मवन्मित्रंतदर्थतापतेविग्रहेप्राणा
नविपरित्यजेत्।विग्रहमिति।एवंविधमित्ररक्षार्थंप्राणानपिपरित्यजेदित्यर्थः।अपमानात्तुसंभूतंमानेनप्रक्रमंनयत्।तथा

सामपूर्वउपायमइतिस्यमप्रतिपादनंतसूर्वउपायोदानंभेदोवाप्रणामोअभिमानजेविग्रहेप्रशमार्थंविधेयइंद्रायसप्रणमति।पा
32 वलीपसेनमती।सा चानानऽरहस्येनप्रयोगेनरहस्यकरणेनवा॥विग्रहशमयेद्धीमानवंधुनाशसमुद्भवांरहसिविजनेभवोरहस्यः
यस्यवंधुविनाशोविहितस्तस्यएकांतेअविदितएवागवाआत्मनिवेदानपूर्वकंसामादीनांप्रयोगेणएतत्राधर्मविजिपिनिद्दष्ट
व्यंरहस्यकरणेनवाअसुरविजपिनिरहस्यानिक्रोधोपशमनमोहनमारणादीन्योपनिषदिकोक्तानितेषांकरणेनवाविग्रहंश
मयेत्।द्वीरोवंधुनाशसमुद्भवमितिप्रतीतं॥येनपीडायेततादृशंतविचक्षणः।जर्यादर्थपरित्यागमेकार्थाभिनिवेशतो।येनार्थ
ता परित्यागेनशत्रोर्नापीडाक्षीणत्वंनजायते।दृशंतुविचक्षणाकुर्यादर्थमेकार्थमभिनिवेशनेरतितार्थसंर्थः।धनायहारजाते ता
उनविरोधंसमाचरेत्।कदाचिद्धिग्रहेपुंसांसर्वनाशस्तुजायते।धनस्यकोशस्यापहारेणजातेविग्रहेसतिविरोधंनसमाचरेत्।क
स्मादित्याहाकदाचिद्धिः तस्माद्बहूनांशापहारःसोढव्यइति।एभिरेवकारणैर्वहुभिःसहसमुत्पन्नेविग्रहेप्रशममाह।तस्त्रो
पन्यासयुक्तेनसंप्रदानादिकेचेत्यर्थः।याभूतानुग्रहविच्छेदजातस्यांतग्रजेह्यशीदेवमेवतुदेवीशमनंसाधुसंमतं।भूतानुग्र

हविच्छेदोः नेतरोऽन्यस्तस्यां तं वशी व्रजेत् नान्यः। दौवमेवैसादिप्रतीतं तथा। मंडलक्षोभसंयुक्तमुपायैः प्रशमं नयेत्॥ इत्यन्यैवेति सुगमं॥ इदानी
वैरयोनिसनिप्रकारमाह। सापत्न्यं वास्तुजं मपराधजं। वैरिप्रभेदनिपुणैर्वैरं पंचविधं मतं। संपन्नः। सापत्न्यजं वास्तुभूम्यादिस्तहूरणादिजं
।स्त्रीजं। अपराधसं। वैरभेदनिपुणैर्वैरं इतितं वदुदंती सुतं इंद्रश्चतुर्विधमेव वैरमिस्यब्रवीत्। तातं भूम्यपराधेन तथाशक्तिविघातजं॥ भू
म्यनंतरजातं च मंडलक्षोभजं तथा। वास्तुजमेव द्विविधा भूमेरूपरोधजं। अनुपरोधेऽपि भूम्यानंतरेणास्य विरोधो भवतीति। तथाशक्ती
नां प्रमंत्रोत्साहानां विघाताज्जातं मंडलक्षोभो द्वास्याराजक एव चतुर्विधं। वैरजातं इंद्रो मन्यते दुःप्रतिविधी यत्वात्वागजातापराधजे
गुरुप्रतिविधेये। कुलापराधजे वैरे मन्यंते द्वे च मानवाः॥ किंचित्सफलं च संदिग्धफलमेव च। कुलजं सपत्न्यं जनिःकारणकं। द्वेषं तु यस्य का
रणकं तदपराधजमेवेत्याह॥ मानवा मन्यंते इति किंचिदल्पतरं। फलं यस्य विग्रहस्यातं तथा निष्फलरहितं संदिग्धफलं संशयितफ
लमेव च। तदात्वे दोषजननमापत्यां चापि निःप —लां आपत्यां च तदात्वे च दोषसंजननं तथा। तदात्वे विग्रहकाल एव दोषजननमित्या
दिविरोधकारकं। आपत्सामागामिनि काले निःफलं तथा। आपत्सां च तदात्वे च कालद्वये पि मित्रविरोधमंडलक्षोभादिकतरं तथैव

च

विग्रहंनकुर्यादितिसंबंधः।अपरिज्ञातवीर्येणदुष्टेनसत्तोमितोमित्रः।परार्थेस्त्रीनिमित्तंचदीर्घकालंद्विजोत्तमैः।नज्ञातंवीर्यसामर्थ्यंयस्य
तेनवसहविग्रहेपरेयान्येनेहेदुष्टेनसत्तोमितोयाहितविग्रहाग्रहाकेशोवाविग्रहंनकुर्यात्।परार्थेपरस्यार्थेसंपद्यतामितिस्त्रीनिमित्तंमे
कार्याभिनिवेशित्वंनदीर्घकालःयस्मिन्दीर्घकालोलगतिद्विजोत्तमैरिति।ब्राह्मणैर्महापावकसंबंधत्वात्।आकालेदेवयुक्तेनव
लोद्धृतसत्त्वेनच।तदात्वेफलसंयुक्तमपेसापफलवर्जितं।अकालेविग्रहंनकुर्यात्।दैवयुक्तेनारिणादैवयुक्तासरीभवति।बलोद्धृतस
त्वेनचेचितिबलोद्धतःसखामित्रादिर्यस्यतेनचतदात्वेवलसंयुक्तमापत्यांवनवर्जितसोपिवैमानहिक्रमप्राप्तंमृगेंद्रवात्॥मत्तम
स्वधस्तविवेकः।उन्मत्तः।उन्मादग्रहीतः।प्रसक्तेतग्रामीकुर्यात्क्रोधंसुगमं।क्रौमंसंकोचमास्थायप्रहारमपिमर्षयेत्।कालेकालेमः
तिमानुत्तिष्ठेत्कृष्णसर्पवत्।संकोचमास्थायअवधयंचवकःकर्परांताःसत्त्वावज्रसमानकर्परेयाग्रहारमेपिमर्षयेत्।कालेसहिसुभि
रिवत्।स्कंधनाविवहेत्कालेप्रियाणिसमुदाहरेत्तेनहिकालउत्थितःप्रसह्यकुर्वीतकचग्रहंश्रियःप्रसादःप्रसन्नत्वंवाऽस्मनोमुखचः
सुषांतेनवर्त्तनांप्रासादुहतिस्तामाश्रितःशत्रोरत्यांकनीयोभवति।आहितलोकवृत्तया।आहितंयस्तलोकवृत्तंपद्य।लोकवृत्तंचा

भव एव

असाहिमुख्यावह्निवत् २

त्रा ऽनुजीविवत्तमेवासंश्रितस्तेनाराधितस्तेनाराध्यत इति तया प्रविश्य राज्ञो हृदयं निरंतरं पिशुनसक्तानां तरं रहितं काले उच्छ्रितं उद्युक्तो विजी

गीषुर्नयाग्रहस्तेन नीतिर्नयस्त्याग्रहस्तेन प्रसह्य हठात् कचग्रहं केशाकर्षणं श्रियः कुर्वीन वलात् स्थैव संश्रितस्य श्रियं गृह्णीयादित्य

र्थः। विग्रहे साध्य विभागं पातव्यस्याभिधातुमाह। कुलोद्गतं सत्समुदारविक्रमं स्थिरं स्वतंत्रां धृतिमंतमूर्जितं। अतीव रातारमुपेतवत्स

लं सुदुःप्रसाध्यं प्रवदंति विद्विषां॥ कुलीनः सपरिजनेन परिस्फुरत्यते। स समम सर्वावादिनं तस्य विश्वसंतीति उदार उत्कृष्टो विक्रमः शौ

र्यं यस्य स हि स्थिरलक्ष्मीको भवति स्थिरश्चापलरहितः प्रतिष्ठत्वात्। आश्रयत्वा। यो भवंति स्रुतत्तस्येयकारे स एव प्रवर्त्तते वितिमंतमवि

षादिनं। वर्जितं च प्रायास मचितं। अतीवदातारं विक्रमादि स समानं उपेतवत्सलं शरणागतवत्सलं इत्यायामिगामिकगुणयुक्तं। सुदुः

दुःप्रसाध्यं प्रसाध्यं प्रवदंति विद्विषां। तेन सह विग्रहो न कार्य इति भावः। विग्राह्यं रिपुमभिधातुमाह। असक्तता निष्ठुरता हततत्तता भयप्र

मादो ऽलसता विषादिता। हृषो मिमानो पि च दीर्घसूत्रता तथांगनासादिव नासादिव नाशनं श्रियः। असक्तता निष्ठुरता हततत्तता भय

प्रमाद इति निद्राहादि विषिद्रियार्थेषु प्रसक्तिस्त्रप्रसादपि ध्यते। अलसता विखादिता। वृथाभिमानी स स्याहंकारः दीर्घसूत्रजउना। तथां

34

गनाक्षादिविनिरवन्नेषंव्यसनजातंविनान्नानंश्रियइत्यादिसंप्रयुक्तोरिपुःसाध्यःसविग्राह्यइति।इतिस्मदोषान्वितमाशुविहिषंत्रिरूर्गोक्ति
पुक्तोविजीगीषयाव्रजेत्।अन्योन्यथासाधुजनैःसुसंमतःकरोतिविद्वानुपघातमात्मनः।इत्यनंतरंदोषाचितमाशुविद्विषंत्रान्तं
शत्रुंत्रिशक्तियुक्तः अतोन्यथोक्तप्रकारंविनासाधुजनेषुसुसंमतःकरोतिविद्वानुपघातमात्मनोविग्रहानुष्ठानादितित्रोषः।उ
पसंहरन्नाह।समचितोराज्यपदोन्निनीषयामनीषयावीक्षितमंडलक्रियः।इमंनयोढिग्रहमार्गमास्थितःस्थिरोद्यमःसंप्रयतेनसम्यक्
सिद्धयेममलंकुर्यादिति।इतिकामंदकीनीतिसारेविग्रहकल्पोनामदशमोध्यायः॥ ॥विग्रहविकल्पमभिधायशाड्गुण्येयानगुणं
प्रतिपादयितुमाह।उत्कृष्टबलवीर्यस्यविजीगीषोर्जिगीषिणः।गुणानुरक्तप्रकृतेर्योत्रायानमितिस्मृतं।उत्कृष्टमन्यमं ----
निर्जेतुमेषणान्नीलस्यजयेषिणः।नेनपुनरुक्ताविशेषप्रतिपादनार्थमेतन्निश्छामात्रेणजपगिच्छतिकिंतुकर्मणापिजयसा
नानामनुष्ठाना ---- यस्यसंप्रयुक्तेरामिगामिकैश्चानुरक्ताःप्रकृतयोयस्ययात्रायातव्यंप्रतिस्थानंयानमितिस्मृतमन्यथानुगम
नमात्रमेवफलाभावात्।यानेनेदानमभिधातुमाह।विगृह्यसंधायतथासंभूयाथप्रसंगतः।उपेक्षाचेतिनिपुणैर्यानंपंचविधंस्मृतं। ५१

विगृह्ययातिहियदासर्वान्शत्रुगणान्शौर्यसाग्रसस्मादीन्अमी॥ गामिकान्स्वगुणैर्यदा आछादिता भवतिपदातेविनीमीषुणा ऐ
विजेयान्विजीषाएवभवंति।यानिहियदावलीशक्तिभिअभ्युचितस्तदाविगृह्ययानंसानज्ञा आचार्याः ममस्त तोविगृह्यमाने
द्वितीयंव्याख्यानमाह॥ एकीभूयपदेकत्रसामंतैसामवायिकैः।शक्तिशौचगतैर्यानंसंभूयगमनंहितत्॥ एकीभूयैकमते
यघातमेकत्रैकस्मिन्यातव्येसामंतैभूम्यनंतरैःसमवायेनप्रसेव्याग्रयेनचरंति।येतैःसहशक्तिशौचदिस्तैर्यानंसंभूयग
मनंहितदितिद्वितीयंसंभूययानमाह।उभयारोस्तु पत्र्यानंद्वयोःप्रकृतिनाशने।संभूयगमनंप्रोक्तंहनुमत्सूर्ययोरिव।उभ
योरपिररिविजीष्योःररिहभयारिस्तद्विपयंयानंउभयोरपिप्रकृतिनाशनेन्नतेसति।प्रकृतिरादित्यस्यमंडलंहनूमतो
मुखमंडलंतन्नाशनेसंजातेततःसूर्योहनूमतासंधायराहुंजेतुगतइस्मदाहरणंहनूमत्।अल्पसारंशक्तीनांमत्सूर्ययो
रिति।पौराणिकाः।तृतीयंसंभूययानमाह।अल्पसारानुपादायप्रतिज्ञायफलोदयं।गम्यतेयसंजैरेतुसंभूयगमनंहितत्
अल्पंसारंशक्तीनांवीर्यंविभ्रतःसामंतानुपादाय।प्रतिज्ञापनाद्वैतेहत्वेदमितिइत्यस्कापलोदयंगम्यते।यस्परंयात्सव्यं

35

जेतुंसंभूयगमनंहितदिति। इदानींप्रसंगलोपानमभिधातुमाह। अन्यत्रप्रस्थितःसंगात् अन्यत्रैवहिगच्छति। प्रसंगयानंतत्प्रोक्तंअत्रन्या
लोनिदर्शनं। अन्यत्रयातव्यमुद्दिश्यप्रस्थितोन्यत्रगच्छति। प्रसंगयानंतत्प्रोक्तंशल्यस्यदुर्योधनंयातव्यमुद्दिश्यप्रस्थितस्यदुर्योध
नेनोपकारैरासाद्यहृतस्ययुधिष्ठिरोयातव्यःसंवृतइति। प्रसंगयानंइति। उपेक्षायानमभिधातुमाह। रिपुंयातस्यवर्तिनःसंप्राप्यारि
हितंबलं। उपेक्ष्यतन्मित्रयानमुपेक्षायानमुच्यते॥ अत्रनिदर्शनं। निवातकवचान्हित्वाहिरण्यपुरवासिनः। उपेक्षायानमाख्या
यन्निजघानधनंजयः। निवातकवचाःप्रचंडदानवाःतन्निग्रहणार्थमिंद्रात्तयानधनंजयेनासन्नानपिनिवातकवचान्हित्वापरिसा
उपासाध्याःतन्मित्राणिपौलोमकालकंजान्दानवान्निजघानधनंजयः। — — — — — योमध्यमएवआयत्तांफलसंयुक्ततदा
लेपफलवर्जितमित्यपमपिमध्यमएव। इतिमंषोडशाविधंनकुर्याद्देवविग्रहं। तदात्वापतिसंशुद्धमारभेतविचक्षणः। इतिसुगमं। त
दात्वापतिशुद्धानिसर्वकर्माणिचिंतयेत्। नदात्वापतिसंतिष्ठेन्नेतिवाच्यतां। सर्वकर्माणिसंध्यादीनिलाभपालनादीनिच। गे
यंप्रतीतं। साधुलोकहृद्ययाहिविद्वान्कर्मसमाचरेत्। परिसपरलोकनार्थं। परलोकविरुद्धानिकर्माणिदूरतस्त्यजेत्। इस्यागम

प्रमाणहतसाधुकल्याणमाचरन्।अन्यमपिपुरुषंपरलोकविरुद्धानिकुर्वाणंदूरतस्त्यजेदितिप्रतीतइत्युक्तेनक्रमेणाकल्याणमाचरेत्
।परलोकाभिगमे आगमसंततंप्रमाणमस्तीति।वेदःप्रमाणंस्मृतयःप्रमाणमितिति।प्रमासैयावलात्सर्वदोभयलोकाविरुद्धमानिष्टे
दिति।विग्रहस्यानुकूलंकालमभिधातुमाह।यदामन्येतमतिमान्हृष्टपुष्टंस्वकंबलं।परस्यविपरीतंचतदाविग्रहमाचरेत्।हृष्टंसन्मा
नादिभिःपुष्टंभक्तवेतनादिभिःस्वकंबलंसैन्यंपरस्यविपरीतमहृष्टमपुष्टंचतदाविग्रहमाचरेत्॥जपस्यावश्यंभाविलाभस्यतंवा
व्ययहृतंवायदिप्रवृत्तिमंडलं।परस्यविपरीतंचतदाविग्रहमाचरेत्।नोपनापियदादेवंसुव्यक्तमुपलक्षितं॥इतिमित्रंआक्रंदआसा
रोयदासुदृढभक्तयःपरस्यविपरीताश्चतदाविग्रहमाचरेत्।मित्रमयातोयातव्यस्यभूम्यनंतरमाक्रंदःपश्चात्पार्ष्णिग्राहभूम्यनंतर
पार्ष्णिग्राहंनिवेद्धुविजीगीषुणाश्चप्रतेइति।आक्रंदस्यपश्चादेवभूम्येकांतरंमित्रंपीडमाक्रंदमारतीति॥एतेत्रयोपियदाविजीगीषो
र्दृढभक्तयोविचलानुरागाभवंति।परस्ययातव्यस्यविपरीतामित्राक्रंदासाराश्चविलभक्तयस्तदाविग्रहमाचरेत्।इतिविग्रहफलविम
र्शमभिधातुमाह।भूमिर्मित्रंहिरण्यंचविग्रहस्यफलत्रयं।यदैतन्नियतंभावितदाविग्रहमाचरेत्॥इतिप्रतीतं।फलत्रयेगुरुलाघवमाह

36

गुरुश्चित्तंततोमित्रंतस्माद्भूमिर्गरीयसी।भूमेर्विभूतयःसर्वास्ताभ्योवंधुसुहृज्जनाः।वित्तसुवर्णादिनद्भुरूतन्मूलत्वाद्व्यवहाराणांततोपिगुरुमि
त्रंमित्रसाध्यत्वाद्वित्तस्यतस्मान्मित्रादपिभूमिर्गरीयसीभूमेर्विभूतयःसर्वाश्चित्तादिकास्ताभ्योवंधुसुहृज्जनाः।गुरवःविभूतिसाध्यत्वा
जेषामिति।समेनापिनविग्रहोविधेयइत्येतदेवसमर्थयन्नाह।सर्वसंपत्सामदानावुपायान्निक्षिपेन्नबुधः।उपायैरप्रतिव्यूढैःस
मेरंडःप्रकाश्यते।सर्वाइतिप्रभुमंत्रोत्साहादिभिःसंपद्भिःसमस्तात्रीउपायान्सामदानादीन्नप्रयुंजीतबुधइतिनीतिपंडितः।उपायैः
सामादिभिरप्रतिव्यूढैःरनिष्पादितकार्यैर्दंडोपिप्रकाश्यते।गत्संतराभावादिति।एतदेवसमर्थयन्नाह।आगतंविग्रहंदृष्ट्वानुपायैःप्र
शमंनयेत्।विजयस्यह्यनित्यत्वाद्रभसेननसंपतेत्।परतोप्यागतंविग्रहंउपायैरनंतरोक्तैःप्रशमंनयेत्।कुतइत्याह।विजयस्य
स्यह्यनित्यत्वात्विग्रहेविजयोनिश्चितंनभवति।हीनैरपिज्यायांसोविनिताहन्यंते।तस्माद्रभसेनपर्यालोचनंविनानसंपतेत्।या
नगुणं———दिति।उपायैःपरिहर्त्तुमशक्येविग्रहेसंश्रयवृत्तिर्दर्शयन्नाह।समाक्रांतोबलवताकांक्षन्नभ्युद्धिंनीश्रियं।
श्रयेतवेतसीवृत्तिंनभौजंगीकदाचन।समाक्रांतःसर्वतोनिरुद्धचेष्टःअभ्यंतरानीमविनश्वसंवेतसीमनुप्रवेशास्वरूपागसं

प्रोगितम १

इत्येवंप्रकार ४

तराभावात्। त्रैविध्यंसुगमं। एतदेवसमर्थयन्नाह। कर्माद्येतसद्वृत्तिःसन्नौह्नीश्रियंभुजंगवृत्तिरामोतित्रिविधमेवतुकेवलं। इतिसुगमं। संश्रयवृत्तिंद

र्शयन्नाह। मत्तप्रमत्तवतस्थितावाप्रसेतो — पंडितः। अपरिभ्रंस्ययोर्ज्जुनइत्यापक्षायांयानभेदानभिधाययातव्यलक्षणमाह। स्त्रियोथयानंम

गयातथाक्षाद्दैवोपघातश्चवकुप्रकारः। इतिप्रदिष्टंव्यसनंतवनेनसमन्वितःसव्यसनी।सुगम्यस्त्रियइतिस्त्री।व्यसनंपानंपानव्यसनंमृगया।

यायर्द्धिस्तयाक्षाद्यूतानिदैवोपघातश्चातुर्भिक्षामारकादिवकुप्रकारइत्येवंप्रकारैमन्यदपिव्यसनंसंप्रदिष्टं। अनेनसमन्वितोरिव्यसनी

सचगम्यायानव्योभवति। सुखोच्छेदत्वात्। आसनमभिधातुमाह॥ परस्परस्यसामर्थ्यविघातादासनंस्मृतं। अरिश्चविजीगीषुश्चतत्सं

चविधमुच्यते॥ आरब्धविजीगीषुश्चपरस्परसामर्थ्यविघातादितरेतरस्यतदायाअवस्थितिस्तदासनंतदपिपंचविधमेवतनर।

भूयासनं यथाविगृह्यासनंसंधायासनंप्रसंगासनमुपेक्षासनमिति। तत्रविगृह्यासनमाह। अन्योन्याक्रांतिकरयोविगृह्यासनमुच्यते॥ अरिं

विगृह्यावस्थानंविगृह्यासनमुच्यते। अरिविजीगीषोरन्योन्यंपराक्रांतिकरयोश्चेष्टायाविवातविधानंतद्विगृह्यासनंविगृह्यातस्थ

योरेवसामर्थ्यविघातेसतियदासनंतदद्विगृह्यासनंएकमरिंचविगृह्यकारणापेक्षयायतस्थानंतदपिविगृह्यासनमुच्यतेतथा॥

ग

37

यथा दुर्गैतः शत्रुर्गृहीतैर्नैकशः क्वचित्। विग्रहेणैव तदासीत छिन्नास्यासारवीवधौ। आसारो मित्रबलमुच्यते। स्वदेशादागच्छति वीवध इति कौटल्यः
मित्रादि प्रतिबलात् स्वदेशादनुपश्चात् यद्धनं वस्त्राद्यागच्छति। तच्छिन्नं विच्छिन्नं विवधौ यदासीतत्तदपि विगृह्यासनमिति। दुर्गनिरोधे वि
धेयमाह॥ ॥विच्छिन्नविवधासारं प्रक्षीणयवसेंधनं। विभज्यमानप्रकृतिं कालेनैव वशं नयेत्। इति प्रतीतं। संधायासनमभिधातुमाह॥
अरेश्च विजिगीषोश्च विग्रहे हीयमानयोः। संधाय यत्समवस्थानं संधायासनमुच्यते। अस्योदाहरणं। निवातकवचैः साकं रावणः शत्रुरावया
:ब्रह्मणामंततरे हत्वा संधायासनमास्थितः। निवातकवचैः संह रावणस्य विग्रहे सति रावणस्तैराक्रांतो ब्रह्मणा गोत्रगुरुमंतरे प्रतिभुवं
कृत्वा शत्रुरावणोऽपि रावणसंधायासनं संस्थितोऽन्यथा निवातकवचैर्विनाश्यते इत्येतदपि संधाय आसनं संभूयासनमभिधातुमाह। उ
दासीनं चेन्मध्यमे वा समानः प्रतितंत्रं कया। एकीभूय व्यवस्थानं संभूयासनमुच्यते। उदासीनमध्यमौ हतलक्ष्मणौ समानप्रतितंत्रं कया।
यदि समानोऽपि कारणादपि योक्ता स्यात्॥ ततंत्रं कया उदासीनमध्यमे विषयभूते व्यवस्थानं संभूयासनमुच्यते। इति प्रतीतं। तथा॥
उभयारिर्हि वांछंतं विना त्राणमुभयोरपि॥ संभूयैनं प्रतिव्यूहेदधिकं सर्वधर्मणा। उभयारिरत्र मध्यमविशेषः तं विशेषेण वांछं

मिच्छंतंविनाशत्रुमभरविविजिगीषोरुपचितशक्तित्वात्तदावक्रुभिःसंभूयैनमुभयारिंप्रतिव्यूहेत्।प्रतिवलयेत्।अधिकंवलवत्तरमितिधर्मे
णासंघट्टतौकन्यांयेनेतिप्रसंगासनमभिधातुमाह।पिपासोरन्यमन्यत्रप्रसंगेनहिकेनचित्।आसनंयत्तदर्थंतैःप्रसंगासनमु
च्यते॥पिपासोरन्यंपासोरन्यंपातुमिच्छोःप्रसंगेनकार्यांतरेणअर्थलाभानर्थप्रतीकारादिनायदासनंतत्प्रसंगासनमुच्यते॥
अर्थज्ञैःशास्त्रवेदिभिः।इतिउपेक्षासनमाह॥आस्तेप्रेक्षारिमधिकमुपेक्षासनमुच्यते।उपेक्षांहृतवानिंद्रःपारिजातग्रहंप्रति।अ
रि त्राभियुक्तोमधिकंदृष्ट्वाआस्तेउपेक्षांहत्वा।तदुपेक्षासनंयथा।उपेक्षांहृतवानिंद्रःपारिजातग्रहंप्रति।ततःप्रतियातरुक्मिणीस
त्यभामासंनिधौवासुदेवाग्रतोनारदःपारिजातमंजरीमहर्घ्यमानंक्षिप्तेपहरिकरस्थितायांचमंजर्यांसमकालमेव।भार्याद्व
येनाभ्यर्थितेनरुक्मिण्यैदत्तेतिसत्यभामयोयस्याएमंजरीतेनरूपेणविनामदंतिनाकंगंतव्यमिति।तदर्थंवासुदेवेनविध्वस्तेदं
डनेइंद्रेणोपेक्षते।नहतमितिद्वितीयमुपेक्षासनमाह।उपेक्षितस्यचान्येनकारणेनहिकेनचित्।आसनंरुक्मिणस्वतदुपे
क्षासनंस्मृतं।अन्येन।अत्रेह।हिनाकारणेन।उपेक्षितस्ययदासनंतदुपेक्षासनं।रुक्मिण्याइववासुदेवेनरुक्मिणीहरणेक्रियमाणे।

38

परिभवादिकं मंगी॥ हस्तस्थे महारुक्मिणी॥ भ्रान्त्या उपेक्षा संनंद्धतमिति द्वैधीभावं गुणमभिधातुमाह॥ बलिनोर्द्विषतोर्मध्ये वाचात्मानं समर्प
यन्। द्वैधीभावेन वर्तेत काकाक्षिवदलक्षितः॥ बलिनोः शक्तित्रयसंपन्नयोः द्विषतोर्मध्ये वाचा वाङ्मात्रेणैव आत्मानं समर्पयेत् नक
र्मणा प्रत्येकमहं त्वदीयो न ममान्यत् किंचित् त्वदीयमेवेति। वाच्यमनयं मित्रभावो ह्यस्मिन्नुभयोरनुभाव इति द्विधाभवनं द्वैधीभावेन वर्तेत। आत्म
रक्षार्थं काकाक्षिवदलक्षित इति। तथा। काकस्यैकमेवाक्षि वामदक्षिणपार्श्वयोः समकालमेव परिहरमाणं न लक्ष्यते। किमेकं द्वे वेति। एवं
भावं द्विरधिष्ठानं धारयेत्॥ एको द्वैधीभाव इति तत्र विधेयमाह। पापयेयत्नमास्थाय संनिकृष्टतरं तयोः। उभयोरपि संपाते। सेवेत ब
लवत्तरं॥ प्रयत्नेनालक्षितः संनिकृष्टतरं तयोर्द्विषतोर्युः संनिकृष्टस्तं कालयापनया प्रतिपन्नस्यैव करोमीत्यानुगुण्यप्रदर्शनमेनं का
लं पापयेदित्यर्थः। उभयोरपि विश्वासाभावात् संपाते बलवत्तरं त्राणार्थं। सेवेतेति तथा। यदा द्वावपि नेच्छेतां संश्लेषं जातिसंविदे।
तदोपसर्पेत्तत्त्वं तु संश्रयेद् बलवत्तरं॥ संश्रयेद् बलवत्तरी। यदा द्वावप्यपरी जातसंविदौ वंचकोयमिति। जातविश्वासौ संश्लेषं संधिने
छेतां। तदोपसर्पेत्तयोः शत्रुपरित्राणार्थं तद्भावे त्वधिकमाश्रयं व्रजेदिति। धिभावा द्विधाप्रोक्तः स्वतंत्रपरतंत्रयोः। स्वतंत्र उक्तो ह

न्यस्तु यः स्यादुभयवेतनः। द्वैधीभावो गुण आचार्यैर्द्विधा प्रोक्तः। एकः स्वतंत्रो अपरः परतंत्रस्तयोः स्वतंत्रपरतंत्रयोर्मध्ये स्वतंत्र उक्तो ऽनंत
रं स्ववक्त्रो। यत्र रक्षा संपद्यते। तत्रैव च यातीति। आन्यस्त्विति परतंत्रः यः स्यादुभयवेतनो भर्त्साहिंसोपि स्वामिद्वयेवेतनं गृह्णन् एक
स्मिन्गृहीतपुत्रदारेस्मिन्ह्यातिद्वितीयेऽनुयातीति। (आन्यस्त्विति परतंत्रः यः स्यादुभयवेतनो भर्त्साहिंसोपि स्वामिद्वयेवेतनं गृ)। संश्र
यगुणमभिधातुमाह। उच्छिद्यमानो बलिना निरुपायप्रतिक्रियः। कुलोद्भूतं सत्यमार्यमाश्रयेत बलोत्कटं। बलिना सुपचित
शक्तिना अभियोगेन उच्छिद्यमानः निरुपायप्रतिक्रियस्तत्र च निरुपाया प्रतिक्रिया यदा स्यात्तदा संश्रयप्रवृत्तिरिष्यते। महादोषो
हि विग्रहः बलसमागमो राज्ञामिति वचनात् उपायांतरे विद्यमाने संश्रयो नेष्यते इति भावः। तदा कुलोद्भूतं कुलीनस्य नोका
र्यं मतिः प्रवर्तत इति॥ सत्यममृषावादिनमाचार्यमनतिसंधायकं श्रयेत् बलोत्कटं अभियोक्त्रपेक्षया बलेनोत्कटमाः सर
क्षार्थं संश्रयिणो विधेयमाह। तद्दर्शनोपास्तिकता नित्यं तद्भावभाविता। तत्कारिताप्रश्रितता संश्रयिणः स्मृतं। तद्दर्शने आश्रितद
र्शने सारांगप्रणामपूर्विकाराधनं नीतता नित्यं सद्भावभाविता तथा चोक्तं। यस्य यस्य हि यो भावस्तेन हि तं नरः। अंतः प्रविश्य मेधा

39

वीक्षिप्रमात्मवशं नयेत्॥ इति तल्कारिना। एतद्दुत्तं संश्रयिणः स्मृतमिति। विनीतवत्तत्र कालं संगमयित्वा गुरुर्विविवातसंगात्परिपूर्णाः सन् क्रमेण
स्ववशो भवेत्। तत्र संश्रितो विनीतवत्सु परमार्थतो विनीतः कंचित्कालं संगमयित्वा गुराविवितसंगात् संश्रितसंवाहनात्। परिपूर्णशक्तिभि
रभ्युत्थितः सन् क्रमेण स्ववशो भवेत्। तत्र संश्रितो विनीतवत्सु परमार्थतो विनीतः कंचित्कालं संगमयित्वा गुराविवितसंगात्संश्रित
संवाहनात् परिपूर्णशक्तिभिरभ्युत्थितः सन् क्रमेण स्ववशो भवेत्। तच्चित्रमेवाराध्ये सर्थः। उक्तगुण संश्रयाभावे विधेयमाह। दुर्गं
वा के शंवा भूमिं वा भूमिसंभवं॥ आश्रयेताभियोक्तारं विसंधिरनपाश्रयः। गसंतराभावे सभियोक्तारं विसंधिमनपाश्रय इति प्रतीतं। स
र्वाणि चैतान्यार्त्तः सन् दद्यात्त्राणार्थमात्मनः। युधिष्ठिर इवेसादिपुनर्जीवन्वसुंधरां। सर्वाणि वलकोशं दंडादीन्यार्त्तः सन् धद्यात्त्रा
णार्थमात्मनः। यत्रात्मा जीवन्नवशिष्यते। युधिष्ठिर इवेसादि प्रतीतं। प्रकारांतरेणाह॥ ॥ कल्याणीवत गाथेयं लौकिकी प्रतिभासते
प्रतिजीवंतमानंदो नरं वर्षशतादपि। त्यजेत्कुलार्थे पुरुषं ग्रामस्यार्थे कुलं त्यजेत्। ग्रामं जनपदस्यार्थे विचार्य पृथिवीं त्यजेत्। निःपायेत
दात्मलाभे वा वाव्यसनेनारियोः श्रितः। प्रहरेद्दावकायस्याः सैषा द्दस्याः काले प्रहर्तव्यः। काले च च्छिद्यत इस्मृ इति। नाकारणात्संगनेषा

तज्ज्यायसा चेतरेण वा। स्वयमपहृतान्दोषान्विश्रंभाद्द्रोहजादपि। कारणाच्छिन्नसंगमं नेयात्। न गच्छेत्। ज्यायसा विशिष्टबलेन चेत

रेण सा -- न वा कस्मादित्याह। स्वयमपहृतान्दोषानस्य यः पुरुषवादेः विनाशः शुल्कलहा दौधान्यहिरण्यादेरौचित्याकरणो व्य

पकृता दोषात् च्छिविश्रंभा द्रोहजादपि। दोषाद्विश्रंभमागतदुष्टांतेवा असाधव इति एतदेव समर्थयन्नाह। संयोगहेतुना गात्राना

न विश्वसेत्स्थितयेपि। विश्वासमागतं संतं प्रायो दुष्टं सप्तसाधवः। संयोगं तुना केनापि कारयेन गत्वापि तत्पथि न विश्वसेत्। विश्वास

सं इति उपसंहरन्नाह। इति बाडुसपमितिसिद्धांतः। अन्येतु द्वैगुण्यमिति च स्वते व्याकुर्वंति। यतो यानासने विग्रहस्य रूपं संधेः परस्य रूपा

नं। विगृह्य सति यानं विगृह्यासनं तत्स्वरूपं संश्रयद्वैधीभावश्च संधेरेव रूपं। अतो द्वैगुण्यमेव। एतदेव व्याख्यातुमाह। सहि गच्छे

श्च तिष्ठंश्च विग्रहं कुरुते यतः। यतो यानासे प्राप्तैर्निग्रहः परिकीर्तिल सहि अभियोक्ता गच्छन् अभियानगुणमातिष्ठन् तिष्ठन्यासन

गुणमातिष्ठन् विग्रहं कुरुते यतस्ततो यानासने प्राप्तैर्विग्रहः परिकीर्तित इति प्रतीतं। तथा अमंधापयानो नास्ति द्वैधीभावः स संश्र

यः। ततो द्वावपि तौ प्राप्तै रूपं संघरुदाहृतं। संधिमकृत्वा द्वैधीभावं संश्रयसहितो नास्ति। संविग्रहोपादानं द्वैधीभाव इति कौटल्यः। से

श्रयस्तु न संधि विनेति। ततो द्वावपि। इति प्रतीतं। संधायेति हि यस्योक्तं तत्संधेरूपमिष्यते। विग्रहेति च यस्योक्तं विग्रहस्य तदुच्यते। रूपमिति वर्त्त
त इति एवं च। संधिश्च विग्रहश्चैव द्वैगुण्यमिति चस्यते। इति स्थितं। एतौ च संश्रयश्चैव त्रैगुण्यमिति चापरे। संधिश्च विग्रहश्चैव द्वैगुण्य
मिति चस्यते॥ इति स्थितं। एतौ च संश्रयश्चैव त्रैगुण्यमिति चापरो संधिश्च विग्रहश्चैव चस्यते इति वर्त्तते। इति संधौ संश्रयस्यानंतरं
भविष्यतीति यमाह। यस्मादन्यसंश्रयते बाध्यमानो बलीयसा। तत्संधिः संश्रयो ह्यन्य इत्युवाच बृहस्पतिः। यस्मात्कारणादन्यं ब
लवत्तरं संश्रयते। बाध्यमानो बलीयसा। न संतसेन संधत्ते इति संधिस्वरूपं। नात्र संश्रयस्य लापोस्तीति संधेरन्याः संश्रय इति॥ त
त्संधेः संश्रयो ह्यन्य इत्युवाच बृहस्पतिप्रतीतं। स्वगुरुमतं दर्शयन् पूर्वकमुपसंहरन्नाह। न्याय्यो गुणो विग्रह एव संध्यादयस्तत्प्र
भवास्ततो न्ये। अवस्थया भेदमुपागतं स तथा षाड्गुण्यमिसेव गुरोर्मतं तः। न्यायेन विचार्यमाण एको विग्रह एव गुणः। संध्यादयो
न्ये नु गुणास्तत्तु च्छा विग्रहानंतरं व्ययदिश्यंते। यातो विग्रहे तमः संधत्ते। संश्रय एव द्वैधीभावः। विग्रह एव यानं कारणादासनं
चेति बोद्धप्रतिभिद्यमानो ह्येक एव विग्रहो गुणा इत्यस्माद्गुरोर्मतं॥ ॥ इति नीतिसारे उपाध्याय निरपेक्षायां यानाद्यासनसं
र्गः ।

अथ द्वैधीभावविवेकस्यैकादशः सर्गः॥ ॥षाड्गुण्यस्यानंतरं मंत्राधिकारस्य संबंधिदर्शयन्नाह। षाड्गुण्यनिश्चितमिति। गु-
ह्यं गूढप्रचारवान्। मंत्रयेदिह मंत्रज्ञो मंत्रज्ञैः सह मंत्रिभिः षाड्गुण्येनंतरोक्तैर्निश्चितानिः संदिग्धा मतिर्यस्य स तथा षाड्गुण्यतत्त्वकृ-
तनिर्णय इत्यर्थः। गुह्यं गोपनीयं कार्यं मंत्रयेदिति संबंधः। गूढं प्रचरंतीति गूढप्रचाराः संस्थासंचारभेदभिन्नाः तैर्विद्यंत इति गू-
ढप्रचारवान् मंत्रज्ञ इति मंत्रः षण्णां मध्ये कस्मिन् गुणे स्थितस्य मे वृद्धिरवृद्धिः परस्य तत्रावस्थित्यर्थः। पर्यालोचो मंत्रस्तत्रस्त-
त्रकोऽवस्थः। तेषां यस्मिन्नवा गुणे स्थितः। पत्रेपदिह स्थितस्य त्वाक्यानि दुर्गमे तु कर्मवणि सथशून्यनिवेशा खनिद्रव्याहस्तिव-
नकर्माण्यात्मनः प्रवर्त्तयितुं परस्य चैतानि कर्माण्यपहंतुमिति सा वृद्धिरेतद्विपर्ययस्तु समा षण्णां मंत्रः स्वकर्मप्रवर्त्तनं परकर्मोपघा-
तश्च यैरुपायैर्भवति। त — — — श्चानेकमंत्रप्रकारो मंत्रज्ञस्तादिस्वरूपं जानातीति॥ मंत्रज्ञो विजिगीषुरेवं मंत्रज्ञैव मंत्रिभिः स-
हेति मंत्रज्ञानस्य फलमन्वयव्यतिरेकाभ्यां — — — — ॥ मंत्रार्थकुशलो राजा सुखं भूतिं समश्नुते। विपरीतस्तु विद्वद्भिः स्वतंत्रो
प्यवधूयते॥ वक्ष्यमाणपंचांगस्य मंत्रस्य योर्थः वृद्धिलक्षणा — — — संपादने कुशलो राजा प्रजारंजनात्सुखमक्लेशेन भूतिं

५१

ध्यश्नुते। विपरीतस्तु विद्वद्भिः स्वतंत्रोप्यवधूयते। वसुश्रियमश्नुते॥ आत्मप्रयुक्ते विपरीतस्तु मंत्रार्थाकुशलः विद्वद्भिः पंडिते—
—रमरामण्यपि स्वतंत्रोप्यवधूयते। राजा सभ्या च्यावते इति। दुर्मंत्रमेनं रिपवो यथा धाना इव क्रतुं। समंततो विलुंपंति तस्मान्मंत्र
परोपरो भवेत्। दुष्टो योयस्य दुष्टत्वं च तस्य स्वात्मविहृत्वं मंत्ररियावा विलुंपंति। समंततो मातुधानाः। राक्षसाः दुःप्रक्तवेदिकमंप
त्नमिव विलुंपंति तेषु मंत्रपरो योक्तमंत्रपर एवस्यादिति। मंत्रया वा विलुंपंति। समंत यथोक्तं लक्षणमभिधातुमाह। मंत्रयेतेह
कार्याणि महासेन विपश्चिता। आत्मनर्षमना संच। मंत्रयेतेह कार्याणि सहासेन यो हि बहुधो निरंध्याप्यते। सतस्याम स्कच्यते
। आप्तव्याप्तावितियाठ ततस्य च व्यभिचारोक्तत्वात् अप्तोपि भूत्वा यदि पश्चिन्नीतिज्ञात् स्तत्र पंडितो भवति तेन सह मंत्रयेत्। एक
द्रव्याद्वीपमेकत्र यस्मिन् विद्यते चेति आत्मसंमूर्खमनातमंसं च येव वर्जयेदिति। मंत्रश्च ज्ञात्वा स्त्रोक्तं मे यो व कार्यः इति स्वर्गीय न्नाह। ऋ २
मार्गसन्मार्गतिभिः सिद्धकर्मभिः। पूर्वैराचरितं सद्भिः ज्ञात्वा यं मा मे मंत्रेण अपरिसृजेत्। ज्ञात्वा यं मामे मंत्रेण अपरिसृजे
त्। इति संबंधः। पूर्वैः षोडश राजादिभिः बृहस्पत्यादिभिश्च सद्भिः सत्पुरुषैरेव चरितं सेवितं च सिद्धये सिद्ध्यर्थं सिद्धकर्मभिः। स

द्भिः सन्मार्गेणैव गतिः। येषां ते इति तयोर्न्नैव मार्गेण मंत्रः कर्त्तव्य इत्यर्थः। उक्तस्यान्यायत्वे दोषं दर्शयन्नाह। उच्छास्त्रपदविन्यासः सहसैवाभि
संपतत्। अस्तु षड्गुण्यन्यासगत्वा न निवर्त्तते। उत्क्रान्तः शास्त्रपदविन्यासः कार्येषु गमनं तस्य पदविन्यासेन निःष्पाद्यं तद्धि शास्त्रं न कर्त्तव्यमित्य
र्थः। सहसैव मंत्रालोचं विनैवाभिसंपन्नाभिमुखं शत्रूणां गच्छन् शत्रून् षड्गुणन्यासमगत्वा न निवर्त्त इति षड्गुणं। धारेव ग्रासं षड्गुधाराया
सो मरणांतं प्राप्य न निवर्त्तत इत्यर्थः। अतो मं। अतो मंत्रपूर्वं प्रवर्त्तितव्यमिति भावः॥ मंत्रशक्तेः प्राधान्यं दर्शयन्नाह॥ प्रभावोत्साह
शक्तिभ्यां मंत्रशक्तिः प्रशस्यते। प्रभावोत्साहवान् काव्यो जितो देवपुरोधसा। कोशदंडबलं हि प्रभुशक्तिः शौर्यममर्षो दाक्ष्यं चोत्साह
शक्तिः। ताभ्यां सकाशात् मंत्रशक्तिरेव गरीयसी॥ इत्यत्रेतिहासं दर्शयति। प्रभावोत्साहवान् काव्यः शुक्रः। महाप्रभावकोशदंडं चं

दित

उद्दैत्यपरिवृत्तो देवपुरोधसा बृहस्पतिना मंत्रशक्त्या जितो वा कस्य दोषः। देवासुरसंग्रामे मृतानसुरान् शुक्रो मृतसंजीविन्या जाति। देवा
मृता मृता एव ततश्च प्रभावोत्ततश्च प्रभावोत्साहसंपन्नो भूत्। तदभिसंधानार्थं गुरुपुत्रः कचः शिष्यत्वेन प्रणिहितस्तेन च शुक्रस्य प्रि
यसुता वशीकृता तदवे दैत्यैरति संधानभयात् कचो विपक्षः शुक्राय भक्षितुं दत्तस्तत्सुतया देवयान्याः प्रार्थितेन काव्येनोदरस्थ ए

५२

वमृतसंजीविन्यापुनर्नवः। मृतउद्दरस्यस्यैवोपदिष्टामृतसंजीविनी। कचस्यविद्यार्थोद्दैत्यैर्निर्यातस्तमामनयेकजीवयेति। तथाहत्वागते
कचेसमरेस्मृतादैत्यानजीवंति। तदनयामंत्रशक्त्यासुरगुरुणाजितः काव्यइत्येतदेवस्यार्थयन्नाह। अशिक्षितनयःसिंहोहंतीभंकेवलं
लंवलात्। तंचधारोनरस्तेषांशातानिमतिमान्जयेत्। अशिक्षितोनयोनीतिशास्त्रंयेनसंतथोक्तोमंत्रशक्तिरहितइत्यर्थः। सिंहःकेवलो
साहसशक्तिःहंतिभंकेवलंवलात्सामर्थ्यात्। तंचेतितमिष्टंनेवाषांचसिंहान्यंशातान्यनेकान्मेतिमान्कूटकपटादिभिःस्थापयेत्। भा
रपेक्ष्यमंत्रशक्तेःसामर्थ्यमभिधातुमाह। पश्यद्भिर्दूरतोपायान्सूपायप्रतिपत्तिभिः। भवंतिहिफलायैवविश्चितितिनाःक्रियाः। पश्यद्भिः
प्रमाणवलात्प्रत्यक्षीकुर्वद्भिः दूरेणादेशव्यवधानात्कालव्यवधानाद्धूमाद्धा अपायान्विनिपातान्सूपायप्रतिपत्तिभिःशिक्षितैस्तैर्भ
नसामाद्युपायैःप्रतिपत्तिर्ज्ञानात्तानपूर्विकापलप्राप्तिर्येषांतैस्तैःविहद्भिःश्वितिनासुपर्यालोचितामंत्राधिकारोक्तक्रियाअनुष्ठा
नानिश्चयेनफलंतीत्यर्थः। क्रियाचिंतनमेवदर्शयन्नाह। उपायपूर्वंलिखितकालवीक्ष्यसमुत्सतेत्। पश्चात्तापायभवतिविक्रमैकर
संहता। उपायःसामोपप्रदानभेदायेचात्राभिमातांदंडेनतुलातःसांशायिकइतिभावः। नसर्वंलघुमिष्ठेत्पानमात्रसाध्येलामेका

तं यात्रानुरूपं वीक्ष्य निर्णीय सम्मुखनेन। पापात्। कस्मादित्याह। विक्रमैकरसं तत्तनायस्मात्स श्चात्तापापभवति विक्रमः परमोत्साहः दैवोऽर्यानि

त्रायस एवैकोरसस्तमेव जानाति मंत्रशक्तिरसं दुसात्ताना तदेशाकालादि निरपेक्षस्य विपन्नेव्यवसायेविक्रमैकरसतत्तनायापभवतिकि याम्र्य ता

समिहं देशाकालवलात्तदिभिरपेक्षोऽव्यवसित इति विक्रमोऽपि मंत्रसहायः फलीति भावः। मंत्रसापत्यमधिधातुमाह। त्राकात्राकापरिच्छेदं

कुर्याद्बुध्याप्रसन्नया। केवलं दत्त ङ्गनं। आदावेकत्र्यकामित्यमत्रार्थं चेति परिच्छेदं कुर्यात्। बुद्ध्या विशुद्धया निनि

र्मलया। ज। अत्राकमिति परिच्छिन्नेदोषं ---- फलमिति दंतिनो दंता दैत्यो लताडनं दंतभयैवनपर्वतक्षतएव मरात्मारण्याक्षतिः गा

। नंतरेतेति तस्मान्मंत्रपूर्वं समारभेतेति ---- यथा विफलाभावेयथात्मात्रमेव प्रारब्धव्यं। पश्चात्तापः स्यात्। नात्यत्वादिति भावः।

तथा। यत्तु सम्यगुपाक्रांतं कार्यमेति विपर्ययं पुमास। ---- वांतरितयो रूपः। एतत्सुगमं। उक्तं च दैवपुरुषकारयोरानुकूल्ये फलसि

द्धिरन्यथा नेति। तथा च। क्षेत्रेसु प्रष्टे एथ्यां च ---- सस्यां दैवं पुरुषवारं च कोटस्यामन्यते। द्वयमिति यद्यपि दैवपुरुषकारयोरा

नुकूल्ये फलसिद्धिस्तथापि पुरुषकार एव कर्तव्य इति स्पर्शायन्नाह। प्रयत्नसावदा स्यि फलायामल बुद्धिना त्रि अपवर्वणेयवनिपुणं

53

रोधं दैवं समाश्रितं। अनुकूलं दैवं चेत् सफलत्वं भवति। प्रातिकूल्ये दैवे फलं न तद्दैवं प्रतिसोमं यदा भवति। तदा अपवर्वण्यपस्थान एव भंगः फ-
लविनाशः स्व निपुणं कुशलमिति मंत्रतत्वाभिधानमाह। आत्मानं च परं चैव वीक्ष्य धीरः समुत्सतेत्। एतदेव हि विज्ञानं यदात्मपर
वेदनं। आत्मानं शक्तित्रयेणासंपचितं देशकालबलमनुकूलशकुननिमित्तग्रहवीक्ष्य निर्णायपरं समतद्विपरीतं भिरूप्यउत्सतेत्। या
त्रां कुर्यात्। धीरो धैर्यसंपन्नो विजिगीषुरेतदेव हि विज्ञानं मंत्रे यदात्मपरवेदनं स्वपरबलापरिज्ञानमेव तंत्रस्य तत्त्वं निषिद्धानुष्ठान
मभिधातुमाह॥ निष्फलं क्लेशबहुलं संदिग्धफलमेव च। न कर्म कुर्यात् मतिमान् महावैरानुबंधि च। तदात्वं वर्त्तमानकालश्चायति
रागामीकालः एतयोस्तदात्वायत्योर्यन्निर्दोषतत्तदात्वामिसुच्यते। तथा शुचिशुद्धेन क्रमेयामार्गेणागतं रक्षणादियथाभूतं र
क्षणादिक्षत्रियस्य हितमुभयलोकहितमनुवधातिचयन्नूतद्भिः सदा कर्म प्रशस्यते। एतदेव समर्थयन्नाह। हितानुबंधिफलकार्यं ग
र्हेणेनन वाच्यतां। तस्मिन् कर्मणि सक्तेन तदात्तकटुकेपिहि। शुभं सर्वं॥ तदात्व॰ वर्त्तमाने सोख्याहितेपिहि स्फुटं। बुद्धैर्वोपक्त
मः श्रेयान् फलनिष्पत्तये सदा। क्वचित् कल्याणमित्येतत्तच्छस्यतेसिंहत्वत्तिनावद्धो वमंत्रसुद्धैनेव प्रारंभः श्रेयान्। कल्याणकल्याण

दंतिनाव्यायम १

निहितहितविधायी निमित्तगुणसंयुक्तानि मित्राणि यस्य तथैव दृश्यते सिंहस्य दन्तिना व्यायामे युद्धेनोपक्रमः। फलम्भिः व्यन्तयेनान्यथा। एतदेवस्य

दृष्टमत्राह। सहसो सत्स्य ष्ठेन्योपातव्येभ्य समतगात्। दुःकरं कर्तुं नशक्यं संपदर्जुनं। श्रियस्समुपार्जनं दुष्टत्वात्तेषां। अदृष्टेत्रे दृष्टांत। उपायेन

प शास्त्रोक्तेनोपदेशेन मत्तदन्तिनो मूर्द्धि पदं न्यस्यनेक्षांसादिकर्मणा न पुनः सहसोऽसत्यमत्तदन्तिनो मूर्द्धि पदन्यासं कर्तुं शक्यते। उपायाश्च

मन्त्रेण निर्णीयन्ते इति भावः। मन्त्रमाहात्म्यमपि धातुमिति भावः। एतदेव द्रढयितुमाह। अत्राकारं दृश्यते। तद्यथा। आभक्षत्तनां कुतः सेवा

तत्र सेपलं। आकाशमास्वाद्यः कुतो हि कवलग्रहः। अत्राकारं भयेनैव हस्तियैर्यां तेषां लौल्यं विहाय न नान्यफलं दृश्यते। तद्यथा। आका शादते लौ

त शमास्वाद्ये आकाशास्वादमनुभवामीति यः कवलग्रहमाकाशस्य करोति। तस्य ह्यतः कुतः कवलग्रहः। आकाशस्यामूर्तत्वात्। एवम

शक्यारंभियोपि कुतः कुलमिति अत्राकारंभेन केवलमिति। अत्राकारंभेन केवलं निष्फलो विनाशोऽपि च भवतीति दर्शयन्नाह। नाग्निं पतं

गवद्गच्छेत् स्पर्शरूपमेव हि संस्पृशेत्। किमन्यस्माद् दृतेदाहात्पतंगस्याग्निमृच्छतः तं गवद्ग्निं न गच्छेत्। — — योपतंगोदीपाग्नि दर्शनसुखी स्पर्श

सुंदरमप्यनुभवामीति। बुद्ध्या नाग्निं गच्छेत् स्पर्शरूपमेव न संस्पृशेत्। पूर्वमेवापरिच्छिद्य अपर्यालोच्य पतंगस्याग्निमृच्छतोपश्चात् दाहदत्ते

५५

किमन्यत्तथामंत्ररहितस्यापीतिभावः।मोहात्स्वकुर्वतःश्चेष्टांदुःखलभ्येषुवस्तुषु।भवंतिपरितापिन्योव्यक्तंकर्मविपत्तयः।मोहान्मंत्रस्तान॰
स्त्वात्कुर्वतश्चेष्टामुद्योगंदुःखलभ्येषुवस्तुषुभवंतिपरितापिन्योवाक्कं।इतिप्रतीतंसम्यभूतेनमंत्रफलावाप्तिरितिदर्शितंकुपन्या।बुद्धावो
ध्यानुमतयापरीयात्संपदःपदं।शुद्धिशुद्धपदन्यासःपर्वताग्नमिवोन्नतं।बुद्ध्यावोध्यानुगतयाज्ञानेनश्रेयानुपायिनाज्ञानंसाधनंश्रेयं
साध्यंसाधनंसाध्यानुरूपंपदं।भवतियदावश्यंभाविनीसिद्धिरितिभावः।तथाचोक्तं।प्रत्यक्षादिप्रमाणत्रयनिर्णीतापायफलसिद्धेय
यासाध्यंसाधनविनियोगलक्षणाक्रियानितिरन्यथान्वनीतिः।एवंबुद्धिर्यदावोध्यानुगताचभवतितदापरीयान्प्राप्नुयात्।संपदोल
क्ष्म्यः।पदमुन्नतमुत्कृष्टंपर्वताग्रमिवविशुद्धपदविन्यासः।विशुद्धांतरापरहितपदविन्यासोयस्यसतथापर्वताग्रमुत्तंपरीयादिति।क
स्मान्मंत्रेमहाननुपलब्धस्याह।दुरारोहंयदराताःसर्वलोकनमस्कृतं।स्वल्पेनाप्यपचारेणाब्रह्मण्यमिवदुष्यति।दुःखेनमहताक्लेशेना॰
नारुह्यतइति।पदंराजत्वंराज्ञांसर्वलोकैर्नमस्कृतं।माहेंद्रसमंप्राप्यत्वात्।स्वल्पेनाप्यपचारेणमंत्रभेदादिकेनब्रह्मण्यमि
वसर्वलोकनमस्कृतमपिसंध्यावंदनमात्रेणापिदुष्यति।सदोषंभवतीतिप्राणस्तोत्कमंत्रस्यफलंदर्शयन्नाह।आरब्धानियथाशा॰

वचन१ नमर२

आवरितःस्कंधावारइतिस्मृतः॥भृतानांभृतिःसंपत्तिर्वातन्निःपभेचारेणमोक्षादिप्रकृतिसमूहेनाचरितः।परिवृतःस्कंधोराज्ञा
कारणंभवतीतिवाक्यशेषः।अतःकारणातस्कंधावारःसपरिवारोराजास्मृतइतिस्कंधावारविनाशकारणप्रतीकारार्थमाह॥
समवस्कंदंयासांतुविवधासारनिग्रहएतेप्रपलातीरक्ष्याःस्कंधावारस्यमर्मवः॥समवस्कंदःसौप्तिकादिशुद्धवलभंनिपातेः।ए
कोमर्मसुर्वासोहस्त्यश्वादिआहारःअंबुयातीयंविवधासारौलव्याख्यातेषांचनिग्रहानिरोधाःप्रसेकंस्कंधावारस्यमर्मचोरतो

८७

न्नपानादिभिर्विनाप्राणिनोनजीवंति। अत एतेप्रपन्नतीरस्याः प्रतीकारद्वारेणाअरक्षिताश्चस्कंधावारस्यमस्तकेभवंति। उपसंहरन्ना
ह। इत्युक्तफलेननिदेशायेद्बलंशुभाशुभंवास्यतथोपलक्षिपेत्। परस्यदैवंनिपुणंविलोकयेत्। समारभेताशुभदीतदर्शीनाद्ध्र
क्तेनप्रकारेणविज्ञायेद्बलंमौलादिकंशुभाशुभंवास्यतदोपलक्षयेत्। विवेशाकालेपरस्यचैतत्शुभाशुभंनिपुणंविलोकयेत्
। समारभेतसंग्राममंअशुभहीनदर्शनेननकिंचिदारब्धव्यमिति॥ ॥इतिकामंदकीनीतिसारटीकायांउपाध्यायनिरपेक्षायांस
मदशःसर्गः॥ ॥विरम्भुपुराभ्यासेस्कंधावारनिवेशंवल्लासहसानयुज्यते। किंचयायप्रयोगयुद्धारंभःकर्त्तव्यइतिदर्शयन्ना
ह। महाप्रज्ञानसंपन्नःसत्वदैवोपबृंहितः उद्योगाध्यावसायाभ्याउपायान्निक्षिपेत्सरे। महाप्रज्ञानंगुणाष्टकयुक्ताप्रज्ञाः शुश्रू
षाश्रवणग्रहणधारणाविज्ञानोहापोहतत्त्वाभिनिवेशाःप्रज्ञागुणाइतिवचनेनसंपन्नःसत्वादैवेद्धतलक्षयोताभ्यामुपबृंहितः
॥स्तनदर्थः॥ उद्योगाध्यवसायाभ्यामुक्तस्वरूपाभ्यांमुकारणभूताभ्यांउपायान्कामोअप्रदानभेदादीन्क्षिपेत्। प्रयुंजीत्परेषा
तव्यइति। कस्मात्मकोशोमंत्रश्चयुद्धंचतुरंगवलंयुज्यते। काशाकथंयुज्यतइतिचेत्कोशादानात्मसात्कृतोऽवलव्यतिरिक्तश्चर

पुरुषा युज्यत इति भावः तथा मंत्री पि युज्यते। मंत्रो मंत्रिभिः सह निर्णीता बुद्धिः परानिसंधान लक्षणा सर्मन्‌। त्र्या त्र्रस्त्रर सरसा॰
दि प्रयोगैः त्राकनं विना त्रायति। तथा चोक्तं। एकं हन्यान वा हन्यादिषुर्मुक्तो धनुष्मता। प्राज्ञेन तु मतिः क्षिप्रा हन्यात्‌ गर्भगतानपि
। अपि च। विषोपदंष्ट्रान खकोटिपाणि भिर्हि सत्सदंडपरावो पि युंजते। अयं विग्रोषः। प्रति सुहृच्चेतसा धनं व्यनारोप्य जयंति परिद्विषः
॥ उपायानभिधातुमाह॥ सामदानं च भेदश्च दंडश्चेति चतुष्टयं। मायोपेक्षेंद्रजालं च सप्तोपायाः प्रकीर्त्तिताः। इति प्रनीते। सामरूपं॰
व्याख्यातुमाह। प्रथितयान्स्तु सर्वेषां सत्कर्मगुणकीर्त्तनं। पूर्वसंबंधकथनं स्वसंबंधकथनं स्वल्पनां परस्परोपकाराणां दर्शनं गुणकी
र्त्तनं। संबंधस्य समाख्यानमायातेः संप्रदर्शनं। परस्परोकारणामिति भवद्भिः अस्माकमस्य मिश्रभवनामिति। तदाद्यं साम गुणकीर्त्तन
मिति विवृत्रा रूपविद्या वित्तचरित्रादि गुणानां कीर्त्तनं श्लाघनं द्वितीयं सान पूर्वसंबंधकथनमिप्रकृति वेषां संबंधायौनसौ खसौ चाद
पस्तेषां कथनं ख्यापनं तृनी सामस्वसंबंधा कल्पनमिति च मस्माकं पिता भ्राता भवतीति चतुर्थं। सामवावापे त्रालपा सत्पुतवाहमि
ति चार्प्यधर्या॥ इतिसाम प्रयोगत्रैः साम पंचविधस्मृतां इति स्पष्टं दानमभिधातुमाह। यः संप्राप्तनोत्सर्ग उच्यते॥ स संप्राप्तो प्रथा भव॰
भिपंचविधम१

स्यत्तमो धर्मो धमो वासंख्यातः सारतोस संप्राप्तधनो त्सत्सर्गउच्यते। ससंप्राप्तोयथामवक्तत्तमो धर्मो धमोवासंख्यातः सारतोवा ससंप्रा

८४ स्यधनोत्सर्गः संप्राप्ति स्तुयथाकथं चिदायभवत्तुप्रतिदानं तथैवान्मा विनष्टस्यापत्। पदय येको दानभेदः॥ सत्वाहुत्तीर्णमपिदीयत

इति गृहीत्तस्यानुवर्त्तनमिति। स्वयमेवादत्तादानत्तया गृहीतमपि कार्यवशात्पदनुवर्त्ततेसाधुतत्तंयत्स्वयमेनेद॥ चगृहीतंमयापूर्वे

मेवसंकलितमित्येवं विधेनानुवर्त्तनयुक्तमिति योदानभेदः॥ द्रव्यादानमपूर्वंचस्वयंग्राहप्रवर्त्तोदेवस्यप्रतिमोक्षत्रास्तुदानं पंचविधंस्मृ

तं। द्रव्यदानसत्सर्थपूर्वमितितदभिनवंदीयतेतत्तृतीयांयथास्वयंग्राहप्रवर्त्तनंपरविषपादीयत्स्वयागृहीतंत्तत — — चिष्यते

मयेति। चतुर्थं देयस्यैव प्रति वर्षदात्तव्यस्यप्रतिमोक्षस्तद्पिदानमेवेत्येवंदानपंचविधं — — भेदमभिधातुमाह। स्नेहरागायन

यनेसंहर्षो साद्नंतथा॥ संतर्ज्जनंचभेदज्ञैर्भेदस्तुत्रिविधः स्मृत इति। स्नेहासौदर्यजश्रीतिया। गुणप्रभवोऽगाः तयोरपनयनंसं

हर्षोत्साद्नंतथेतिस्निग्धकर्मसुपदिसंहर्षः स्पर्द्धोद्वाघतेत्तस्यापि भेदो भवतिसंतर्ज्जनंचतथायघनेनमहैककार्यो भवति —

पत्तेभविष्यती एवभेदज्ञैर्भेदस्तुत्रिविधः॥ स्मृतइतिदंडमभिधातुमाह॥ वधोर्थहरणंचैवपरिक्लेशस्तथैवच। इतिदंडविधानज्ञै

दंडस्तुत्रिविधःस्मृतः।वधोविनाशः।एकोगादन्रोषांगस्यवाअर्थ—अर्थोविवहिश्वराःपायासहरणमपिदनक्रियैवपरिक्लेशस्तथैवच
।कर्मणांपातनयाहिनाव्यापा—साधिसंपादनरूपोवाइत्येवंदंडविधानात्रैदंडोपिविधइतिवधदंडमपिदमनक्रियैवपरिक्लेशस्त
द्विधग्रोत्तपादयंन्नाह॥प्रकाशश्चाप्रकाशस्तश्चदंडोद्विविधउच्यते।प्रकाशदंडान्कुर्वीतलोकद्विष्टांस्तथारिपून्।प्रकाशःसकल
जनविदितः।अप्रकाशःकेनाप्यविदितः तत्रप्रकाशदंडान्कुर्वीतलोकद्विषान्चौरपटदारिकादीन्तथारिपून्भूमानंतरादीनि
ति॥अप्रकाशदंडोपेषुप्रसयोपत्तमभिधातुमाह॥उद्वेजातेदितिलोकोपैयैचनपवत्तभां।व्याधंतेभ्यधिकंपेतुतेभूपांशुःप्रकाश
तोपेद्वूतेलोकउद्विजतेउद्वेगंजाति।स्नेहलोभादितिपैधनपवलभाभूत्वावाधतेभ्यधिकंप्रजा॥इतिदोषाहियेवातेभूपांशुःगूढव
धःस्मृतोनान्येषप्रकाश्यते।उपांशुशब्दस्यचव्युत्पत्तिः॥अश्वव्यालोपधिनउपमत्ताव्याप्तिर्यस्यैतेकदेशावर्तित्वात्।उपांशुनप्रकट
मिति।उपांशुवधस्वरूपमभिधातुमाह॥विशेषेणपनिषद्योगैशस्त्रेणोद्धर्तनेनवा।तथोपांशुनयेदंडंपपाप्योनविभावयेत्।विषे
णशस्त्रिमेणाकृत्रिमेणवासउपनिषद्योगाअभिचारणधूमांशुद्रवणादिभिःशस्त्रेणागूढप्रयुक्तेनवास्पर्शोविमुक्तेनवातथोपां

89

शुरदंडेनापेत। प्रयुंज्यात्यथोन्योनविभावयेद्विषि। यत्रदंडेनप्रयोज्यस्तदाह॥ ब्राह्मणेजातिमात्रेपिधार्मिकेवांसजेऽथवा॥ धर्मोन्निनीस्या
दिपरधर्मोग्निनिपयाधर्ममनूतिनेनुमिच्छायाधीमान्। नवधदंडमादिशेन्॥ राजेति। त्रयांशुप्रकारमभिधातुमाह॥ उपक्षावाहंत
व्यये भूपांशुप्रत्नास्यते॥ उपेक्षावापिनिपुणः प्रत्यक्षंवरिवपर्ययेन॥ (प्रत्यक्षे) शुआन्येर्हन्यमानानुमाह्यइत्यर्थः। प्रत्यक्षोपेक्षयानुर्वं
कनीयःस्यादित्यर्थः। उपायाः प्रयोजगकालेसंस्तुत्यप्रयोक्तव्याव्याइत्यतद्दर्शयन्नाह॥ प्रत्यंपत्रिकेयंनासिदष्टासाधुविवन्निवाम्नवन्निवा
म्रतंसामप्रयुंजीतप्रीत्संवचः। प्रलिंपलितवेत्तांसिप्रह्लतत्वाद्मन्नस्नाविणासाम्ना चंदनाधिकस्यनेनेति। इष्टव्यंदष्टासाधुविव
त्रिवसामप्रयोगोर्हान्नयनानिपंचदृष्टिः स्निग्धाख्यापरत्रिद्वांतदृष्टिमध्येसतलक्षणातद्यथा॥ व्याकोत्तानस्तेहमधुरास्मिततारा
भिलाषिणी। सानंदभ्रूकृतादृष्टिः स्निग्धेपंरतिभावनेतिधवन्निवाम्नतेसामप्रयुंजीततस्यचस्वरूपंकिमित्याह। प्रियंदृष्टववस्त
सामेत्यच्यतेतत्त्वसामविशिष्टगुणयोगात्। त्रिविधमितिदर्शयन्नाह। वागनुद्वेगजननीसामेतिपरिकीर्त्यते। सामास्पास
न्नासांत्वाप्रियेस्तोत्रचकीर्त्यते। सैवसामाख्यावाकसूनृतासांत्वायथाक्रमंप्रियेह्योत्रैवकीर्त्यते। सामैवयदाप्रियंभव

नितस्त्रूनत्नमुच्यते। यदीसास्वात्रंतदासांत्वमिति। सामन्तंन्नदानेनमन्त्रामनयेत्। इंद्रोपचारेशुक्रस्यदानेनत्रामभेपिवान्। दारुण्या
मप्रतिविधेयंविग्रहंविरोधंविद्वान्विजिगीषुर्दानेनप्रशममंनयेत्। इंद्रोपचारेशुक्रस्यइंद्रोदेवराजःशुक्रस्योपचारेदेवानामुपद्रवलक्ष-
णेघोरेऽत्यौपातिकैरौपनिषदिकैर्मायायोगचारणविद्वेषणादिभिस्तथामृतदैत्यसंजीवनादिभिश्चकृतमहापकारेशुक्रस्यशिष्यकचहस्ते
नमृतसंजीवनविघातेनकरणभूतेनत्रामभ्युपत्रामभेपिवान्। गतइति। दानमाहात्म्यंतथा। अपराधेनदुहितुःकुपितेभृगुनंदनोवृष
पर्वाप्रदानेनदानवेंद्रोभवत्सुखी। अपराधेनदुःखेनदुहितुर्दानवेंद्रस्यवृषपर्वणःसुतायाःशर्मिष्ठाभिधानायाःकुपितेचभृगुनंद
नोवृषपर्वादानवेंद्रप्रदानेनस्वदुहितुरेवाभवत्सुखी। तद्यथादानवानामिंद्रस्वामीवृषपर्वाभिधानतत्सुतादेवधानीतयोःकलहेश
र्मिष्ठतयादेवयानीकूपान्कूपानक्षेपपातिनेश्रुत्वाशुक्रेणमंत्रित्वंपरिस्सक्तमितिस्वसुतांशर्मिष्ठांसहस्रकर्मिकायुक्तादेवयान्यैदा
सीगत्वाअनुनयंग्राहितइतिउपलब्धंधाविदातव्यंबलिनेत्रांतिमिच्छता। समूलएवगांधार्योअप्रपन्नानगतःक्षयं। उपगम्यलब्धंदानु
वर्तनमनेकप्रकारमपिइत्वादानव्यंनत्विनेराज्ञित्रयसंपत्रापत्रांस्ति। मिच्छताआत्मनोभ्युदयमिच्छतासमूलएसकलसहितएवदु

९०

योधनोगांधार्या अपत्येअप्रपच्छन्नरूपंचाविग्रामानक्षयंगतस्तस्माद्दानादात्मारक्षणीयइतिभावः।भेदप्रयोगमभिधातुमाह।किंचित्प्रप
च्छन्नभूपस्यात्तयायाविप्रलंभयेत्।भिद्याच्चतुर्विधान्भेदान्प्रविन्यस्योभयवेतनैः॥किंचित्प्रपच्छन्नपिकिंचित्स्वल्पमधिकादानेन
रात्रुवृद्धिर्माभवत्वितिभूपस्यात्तस्याप्रतिलोभयन्बहुतरामात्रान्जनयन्भिधात्विश्लेषयेत्।घातवान्।चतुर्विधान्च
तुःप्रकारान्भेदान्ह्रत्वान्तयाचकोटस्यः।क्रुद्धलुब्धभीतियमानिताःपरेषांतस्यापतिकैःकरणभूतैरित्याह।उभयवेतनै
र्विज्ञीषीपातेच्येवेतनंजीविकायेषांप्रविन्यस्यांनरंगतानांगत्वेति एतमेवव्याख्यातुमाह।अलुब्धवेतनोलुब्धोमानीवाव्यवमानि
तः।क्रुद्धश्चकोपितःकस्मात्तयाभीतश्चभाषितः।विशिष्टवर्णोविवेतनंअलब्धवेतनोभेद्योभवति।क्रुद्धश्चकोपितोयस्मान्कार
णोविनैवभेद्योभवति।भीतश्चभाषितोभेद्योभवति।यथाभिलषितैःकामैर्भेद्यादेनान्चतुर्विधान्।परपक्षेचयथावत्।यथा
भिलषितैःकामैरितियेषांभेद्योभवति।नाकरनिर्वेशितःअकरहिरण्यकरस्यआदापापियःकरयःक्रियतेसभेद्योभवति।रणा
प्रियःसाहसिकआत्मसंभावितस्तया।विछिन्नधर्माकामार्थ।क्रुद्धोमानीतः।रणप्रियातिसत्त्वात्मत्वान्भोगप्रियोभवति।भोगसं

ती वि मा १

प्रशमनयेत् ३

पादकधनलाभस्तेनानेन भेद्यो भवति साहसिक इति। सहो बलं तेन चरतीति असावपि भोगप्रियः भेद्यः स भवति। आत्मसंभावित इति आ

त्मानं आत्मनैव संभावयति विद्याशौर्यादिभिरन्यो मत्समानो नास्तीति मिथ्यो नानुष्ठो भेद्यो न भवति। विच्छिन्नधर्मकर्मार्थकामो वा

विच्छिन्नोपस्ययत्नः स तदुद्वेगाद्भेद्यो भवति। विच्छिन्नाधर्मार्थकामो वा विच्छिन्नो मानी विमानीत इति मानार्थयो मर्विमानः क्षपते सो

भेद्यो भवति। भीरुत्वदोषवित्रस्तः कृतवैरिभिसांधितः। अतुल्येन सहादिष्टः तुल्यमानान्निराकृतः। भीरुत्वदोषवित्रस्तो भेद्यो भव

ति कृतवैरोभिसांधित इति कृतवैरं विरोधः पश्चादभिसांधितः कृतसाव्यसहिसामर्षदोषहृद्यो भोभद्यो भवति। अतुल्येन सहादिष्टक

र्मणि नियुक्तः उद्वेजनाद्भेद्यो भवति अस्यमानान्निराकृत इति। तुल्यं महजानि राकृतनो निराकृतो निराकृतो भेद्य एवा अकारणान्निरुद्ध

श्च कारणाच्च विशेषितः॥ अकारणासरित्युक्तं पूजार्हो पति पूजितः। दोषं विना कृतावरोधः भेद्यो भवति। अकारणास रित्यक्त इति भावि

नि भूतत्युपचारो दृष्टव्यो न्येषामिभिन्नस्य भेद्यत्वं न यथाता पूजार्थे प्रति मानिता भेद्यो भवति। कृतद्रव्यकलत्रश्चामहाभोगाभिकां

क्षकः परिक्षीणो बहिर्बंधुबहिर्दृष्टव्यो बहिः कृत इति। त्रिनपस्यापि बहिर्भावात् भेद्यो भवं से ते॥ इति भेद्या समाख्याताभिंद्यादेता

९।

नृपरेपातव्येस्थितान् उपजापवक्ति यथा आगतांश्चपरकीयान्पूजयेत्। योयस्यकामैः स्तैपूजयेत् निजांश्चमेधान्प्रशमंनयेत्क्रोधादीनामपन
यनेनभेदोपायानमभिधातुमाह। सामतत्त्वानुसंधानमत्युग्रभयदर्शनं। प्रधानमानदानं चभेदोपायाः प्रकीर्त्तिताः सामवृत्ततत्त्वक्ष्याभेदो
पायोभवतिप्रियंवदेनुरागोभवतीति तत्त्वानुसंधानं यस्ययन्नामिलाषतत्ताभावज्ञायदर्शनान्तत्त्वातस्यानुसंधानमवच्छेदोभेदो
पायोभवति। अत्युग्रदर्शनमपिभेदोपायइतितथाचकौटल्यः। शंकाजननमभिभर्त्सनंचभेदइतिप्रधानैर्मानंचभेदोपायानांमध्ये दानं
दानमानेप्रधाने भूपभेदापायादिभिरूपायैर्भेदः संपद्यते इतिप्रतीतामिहविषयमभिधातुमाह॥ भेदंकुर्वीतमतिमान्विग्रही
तोबलीयसा॥ खंजमर्कौसुरैर्भित्वा बलवतौपराजितौ॥ मतिमानथविजिगीषुर्बलीयसाअत्युपचितशक्तिनाविग्रहीतोभेदंकुर्वी
त॥ तथा चाखंजमर्कौसुरैर्भित्वाविभिन्नौतत्वाबलवंतौपराजितौ॥ तद्यथामहर्षिः पुत्रौखंजमर्काभिधानौ शुक्रशिष्यावाखोत्रान
सेसर्वशास्त्रपरंप्रावीण्यंगतौ। अपनिषदिकोग्रिस्तंभनमोहनमारणादिभिर्देवोपद्रवकारकौतद्वलादैत्यैः सर्वदाशत्रुस्थान
भ्रंष्टैः क्रियतेततश्च बृहस्पत्युपदेशादिंद्रेणायज्ञात्रादानात्तौतदिदयेनायापियज्ञतौ भौबभेते। ततश्चताभ्यांपरिसक्ताः दैत्या

ग१

९९

श्वक्रंणसुखेनेववनिताः इति भेदसामर्थ्यं भेदस्य फलमभिधातुमाह। दंडेनैव हि सामान्यात् भित्त्वारेः संहतं फलं। भिन्नं हतं काष्ठमिव

प्रणाजग्धं विशीर्यते। अरेः संहतं बलं भित्त्वा भेदोपायैः भेदोपायैर्भिन्नं कृत्वा दंडेन हन्यात् किमर्थमित्याह। भिन्नं सत् पश्चाद्धतं घुण

जग्धं काष्ठमिव विशीर्यति विध्वंसो भवतीति। दंडप्रयोगकालमभिधातुमाह। अन्नाहदेशकाले तु संयुक्तः सुसहायवान्। युधिष्ठिर इ ।

वासर्थे दंडेनास्तं नयेद्रोन्। उत्साहस्मतलं क्षणादंशो युद्धपान योऽरनुकूलः कालस्तथैवानुकूलस्तैः संयुक्तः सुमहायवान्।

४ वासुदेवादिसहाययुक्तो युधिष्ठिर इव पदानि जीगीर्भवेत् तदा दंडेनास्तं नयेदरीनिति। आत्मनः शक्तिसमृद्धीस्य दंडमप्यधिकेन

येत्। एकीशक्तिसंपन्नो रामः क्षत्रं पुरावधीत्। शक्तिमुत्साहाभिधानामुद्दीश्य निरूपा दंडमप्यधिकं पकाकी प्रभुशक्तिरहित उ

त्साहशक्तिसंपन्नो रामो परशुरामः क्षत्रं क्षत्रियकुलं एकविंशतिधाऽवधीत्। इदानीं विषयविभागेनोपायानां प्रयोगमभिधातु

माह। मप्रयोगविषयानेवनावदाह। अलसं विक्रमे श्रान्तं विक्षतोपायाय चेष्टितां क्षपवायप्रवासे श्रसंतप्तं परिविट्रितं। अलसं

निरुत्साहं विक्रमे श्रांतं युद्धादिषु निर्विण्णं विहितोपाय चेष्टितं। उपायाः सामादयः। चेष्टितं शारीरव्यापारस्तद्धिहितं क्षपव्ययप्रवा

सैश्च संतप्रमिति प्रतीवं। परि विहृतमिति संग्रामे ऽनभंगं। भीतं मूर्खं प्रियंवा लं धार्मिकं दुर्ज्जनं पशुं। मैत्रीप्रधानं कल्याणबुद्धिं सांत्वेन
साधयेत्। भीतप्रतापाद्देवत्रस्तं मूर्खमविज्ञातनीतिशास्त्रं स्त्रियं वालमिति प्रतीत्तं धार्मिकं प्राणिहिंसाभीतं दुर्ज्जनं दौष्ट्ययुक्तं प
शुं पशुकल्पं मैत्रीप्रधानं स्तभावत एव हृतवैरं कल्याणबुद्धिं सर्वत्राहितबुद्धिरहितं। एतान् सतान् सांत्वेन हृतलक्षणेन सामवि
शेषेण साधयेत्। विनोपक्षयं सुखसाध्यत्वात्तेषामिति। दानसाध्यानभिधातुमाह। लुब्धं क्षीणां च दानेन सत्कृस्य वत्रा मानयेत्।
अन्योन्यत्रां कयामिंधात्। दुष्टान्वैदंड दर्शनोपक्षयं सुखसाध्यत्वात्तेषामिति। दानसाध्यानभिधातुमाह। लुब्धं क्षीणां च दाने
न सत्कृत्स च त्रामानयेत्। अन्योन्यं त्रां कयाभिंद्यात्। दुष्टाचौ दंड दर्शनात्। इति प्रतीतं भोत्स — — — — — अवक्ष्यमायांतिव
त्रां विपश्चितामुपायसंदंत्राबलेन संपदः। भवत्सुदारं विधिवत्प्रयोजितं फलहियात्तां क्वचिदर्थसिद्धये। विपश्चितां नीति पं
डितानां संदंत्राः जो हकारोपकरणं। तेन यथास्थितमपि सुवर्णादि बलाद्दाहुष्यवत्रीक्रियते। तयो पापसंदंत्राबलेन संपदो
विभूतय इति भवत्सदारमुत्कृष्टं विधिवत्प्रयोजितं त्राम्नोक्त विधिना प्रयुक्तमुपायजातं फलं फलं हियस्मात्तां क्विजीगीषूणां क्व

चिदेवविधिवन्नात्यत्यत्फलंभवति।अर्थवृद्धयेप्रवृत्तानांननुसदाभवतीतिभावः॥उपायकल्पोनामाष्टचतुर्थोपापका
लंयत्प्रयोजनमभिधातुमाह।सामादीनामुपायानांचपाणांविफलेनये।विनयेन्नपमुद्युक्तोदण्डंदण्ड्येषुदंडवित्।सामादी
नामुक्तलक्षणानांत्रयाणांउपायानांविफलेनयेप्रयायनेउपायकार्यसिद्धौविनयेद्विरोषणाप्रापयेनयंदंडंनपञ्जास्त्रोक्तंप्राप
येत्।दंडेषुकृतदोषेषुपरपक्षेपातव्यलक्षणोपेतेषुक्रोधलोभादिनानेतरेष्विति।जितारिषड्वर्गपातव्यलक्षणोपेतेषुक्रोध
लोभादिति।नेतरेष्विति।जितारिषड्वर्गोपातव्यलक्षणोपेतेक्षत्रौसुविज्ञातेचदोषेदोषोदोषानुरूपंयोदंडंकरोति।असौदंडवि
दितिदंडोत्रपातव्यालक्षणोरिःप्रोक्तेतिदंडप्रयापनंसंग्रामाख्यमभिधातुपूर्वविधेयंतावदाह।देवानभ्यर्च्यविप्रांश्चप्रशस्त
ग्रहतारकं।षड्विधंतुवलंव्यूह्यद्विषतोभिमुखंव्रजेत्।पातव्यक्षणोपेनेदंडेत्रात्रौसंग्रामेणाडंवकर्तुकामोविजीगीषुर्देवानिष्टन
भ्यर्च्यअधिकृतानपिकाश्यायनप्रभृतीन्विप्रांश्चायथोक्तलक्षणानपिप्रशस्तग्रहतारकान्नक्षत्राण्यनुकूलानितथाचंद्रबलं
यथा।तथातारावलमपिगृह्यषड्विधंवक्ष्यमाणाक्रमेयास्वंबलंपत्सादिरचनपारवापिद्वाद्विषतोपातव्यस्याभिमुखंव्रजेत्।वि

बृहद्दंडादि

93

जीषुरिति। बलास्वरूपं गुरुलाघवं चाभिधातुमाह। मौलं भृतं श्रेणिसुहृत् द्विषदाटविकं बलं। पूर्वं त्वाद्यो यस्तु बलानां व्यसनं तथा मूले भवं
मूलं वा मूलभूतपुरुषसंबंधादागतं मौलं भृतं भरणेनोपगृहीतं श्रेणी संघधर्मेणाव्यवस्थितं कुविंदयदिकाकारसमूहः सहृद्बलं
साहाय्यागतं मित्रं बलं द्विषद्बलं दंडोपादानं शत्रुबलं आटविकबलं स्वमंडलाटवी भोक्तृबलं। सहाय्यागतमेव पूर्वं उद्दिष्टा
नां गरियागुणैरधिकं बलानां मध्ये भूतात् मौलं श्रेणिबलाद्भृतं इति सर्वत्र योज्यं व्यसनं तथा पूर्वास्मिन् जायमानं गुणाप्रतिलो नयस
।म्यादिकं व्यसनं च गरीयः इति। एतदेव समर्थयन्नाह। सत्कारादनुरागार्थसहसंकथनासमात्। निसंतद्भावभावत्वान्मौलं भृत
बलाद्गुरु तेपि तृपैतामहसंबंध्यासत्कारार्हमित्यर्थः अनुगाश्च परिचयपदेनुरक्तं भवति। सहरात्तासकथनं मालाय आसनं च स
वदालयनं समीपे चासनं ततो निमित्तान्निसंतद्भावभावित्वात् सहजद्विक्षयत्वादित्यर्थः अतो मौलं भृतबलात् गुणाधिक
मित्यर्थः। संनिहितत्वात्पानिसंक्षिप्रोत्थानतया तथावृत्तेश्च साम्यधानत्वात् भृतं श्रेणीबलात् गुरुः। तुल्यं सद्वर्षणारोधात् सि
द्धि लाभात् तथैव चाबला जानपदा त्वाच्च मैत्रात् श्रेणीबलान् गुरु। इति स्पष्टं। संख्यातदेशकालत्वादेकार्थोपगमात् तथा।

थे

बला तस्मिन्हन्ययोगाद्वत्रस्त्रोमित्रबलं गुरु। इति प्रतीतं। प्रसक्त्याधार्मिकात्लुब्धाच्चनार्यासत्त्वभेदिनः। तस्मादारण्यकतयात्तेभ्यः शत्रुबलं गुरु। इति स्पष्टं। उभयं तद्धि लोपार्थं कालापेक्षाव्यवस्थितं विलोपे व्यसने चैतत्त्राण्यरिजयोध्रुवः॥ उभयं शत्रुबलमाटविकं लयात मविषयविलोपार्थं भवति। राष्ट्रविलोपात्पातव्यस्य प्रभुशक्तिक्षय इति यदि विजीगीषुः शक्तिं उपचयकालं प्रपश्यति। तथा इति एतत्पानेति न केवलं विलोपार्थं विजयार्थमपि भवति। तद्यथा विलोपे क्रियमाणो व्यसनैः शत्रोस्तथापीति पंचम्यर्थे सप्तमी। तस्माद्ध्रुवविजयाध्रुवस्तेनापि तातव्यः साध्यो भवतीत्यर्थः॥ उपतापहतात्तु स्योऽद्वयादाभ्यां तेन पहतभयं तस्माद्भ्रश्येत्। सावधानो भवेद्धि जिगीषुरुपजापं विघटयेदित्यर्थः॥ आभ्यामिति द्विषदाटविकबलाभ्यामिति विशेषतो यस्मात्ते संनिहितो महते प्रकाराय प्रभवतः कान्तिर्व्यसोपवर्पेद्विषदाटविकबलेतदुपजापात्। ध्रुवे जेयो विजीगीषोः स्वद्विधेपि वज्ञेययास्मिन्काले उपादेयं तद्विलोपादीनमभिधातुमाह। स्फीतसारानुरक्तेन मौलेनोपचितः परः। तत्तुल्येनैव पातव्यं क्षयव्ययसहिष्णुना॥ तत्तुल्येन परतुल्येनैव विजीगीषुणा क्षयव्ययसाहिष्णुता मन्यपुरुषक्षयो हिरण्यधान्यापं

च

९५

चपात्रो सहते इति। प्रहृष्टे ध्वजिका सेवागच्छेन्मौलैः सुमानितैः। मैलास्तु दीर्घकालैत्वात् सपत्नहि सवः। इति स्पष्टं। वस्तु षेतेन। समंनये
त् कुत इत्याह। दीर्घकालाध्वखिन्नेषु दीर्घेणाधनादीर्घेण न च विग्रहकालेन्यखिन्नेषु दीर्घेणाधनादीर्घेणा च विग्रहकालेन खिन्नेषु-
श्रान्तेषु भेदभयं भवति। पातव्यहतोपजायेभ्यस्तेभ्यो भवतीत्यर्थः। एतदेव समर्थयन्नाह।। बहुलासरसैन्यानां दीर्घकालाध
भेदतः नित्यं प्रवासयानाभ्यां भेदोवश्यं हि जायते। पातव्यसैन्यानां प्राचुर्यात् स्वबलानां च भयं भवति। तथा दीर्घकालाध्वखेद
तः प्रतिदिनप्रवासः प्रातिदिनं प्रवासः प्रातिकूल्योवासः — — प्रातिकूल्यात् निस्समानात् अनिर्विण्णानां वा तानाम वश्यं भेद
श्चित्त विश्लेषो जायते। ततश्च परगृहीतेभ्यस्तेभ्य एव भयं भवेदित्यर्थः। ततः स्वबलोपादानकालः चतुर्भिः श्लोकैः — — हेतुमाह। प्र
भूतं मेभतबलं मौलमस्यमसारवत्। अरेरल्पं विरक्तं च मौलं प्रायोल्पसारवत्। भृतबलं वेतनेनोपगृहीतं प्रभूतं मे विद्यते प्रभू
मे पितृपैतामहं संख्य — — — इत्यसारवत् सार रहितं अरेः पातव्यस्य मौलं अल्पं तदपि विरक्तप्रायो वा कुल्येनाल्पसारवत
। स्तोकसारमुक्तं तथा।। प्रायो मंत्रेण यो द्धव्यमल्पायासेन वेतिष्ठि।। — — — — स्पकालो वा प्रवभूवक्षपदाये प्रायेबाहुल्येन

मंत्रेणेोतिकुटयुद्धेनवा। स्त्रातिरसप्राणिधानेनबलक्षणेोनयोद्धव्यंनप्रकाशयुद्धेनमंत्रेणाल्पायासेनवाइति। अ— —पादितिसंबंधः। अ
ल्पोदेशा प्रयाणस्यकालस्याल्पप्रपलस्यचहस्यो चव्य चक्षयो। श्रांतोपजापविश्वसंयस्मात्सैन्यंपरस्यवा। अल्पप्रसारो हंतव्य इ
त्यपेक्षाभ— — —श्रांतंतदुपजापविश्वस्तंवथांतंयुद्धेनेत्यादिभिरुपजापेनाविजीगिषुभूतेनात्मसात्कृतत्वाद्विश्वस्तंयस्मात्कारणात्
सैन्यंपरस्यतस्मात्भूतवलोपोयादितिसंबंधतपा— — —लोहंतव्य इति। सर्वतोवनाजीवप्रसाररतिमसारलक्षणंतृणाकाष्ठ
घासवलाद्यर्थसर्वतःप्रसरणंप्रसारः सयातव्यस्यात्हंतव्यः संकटप्रदेशावस्थितत्वात इतिपापा— —बलैर्वासस्याल्पत्वात्
श्रेणिबलोपादानकालमभिधातुमाह। स्फी तंश्रेणिवलंत्राकंआधातुपानवस्तुनि। प्रयाणाकर्मणि ह्रस्वेप्रयासव्यायाप्रावि
। तिप्रयासक्लेशा व्यापामोशुद्धंतौ ह्रस्वावेवश्रेण्यासमुसतेत्। श्रेणिवलमुपादायगच्छेदितिसंबंधः। तु हदुपादानकालमभि
धातुमाह॥ तुप्रभूतंसुहृत्सैन्यंत्रा कमाधातुमात्मनि। अल्पप्रयासोमंत्राश्च भूयोव्यापीमयोधनी। तुप्रभूतसुहृत्सैन्यंतत्त्वत्रा
कमाधातुंस्थापयितु। आत्मनिआत्मकार्यसंपादनेनिर्वैरकर्तुंसामदानादिभिरल्पप्रयासः संनिहितत्वात्यातपातव्यस्य

95

युद्धं मंत्रेणेति संबंधयेत्। कूटयुद्धेन कूटं युद्धं च तीक्ष्णं रसनानादिस्रादिप्रयोगः। एवंभूते काले सुहृद्द्वैलेर्पामाद्विति वाक्यशेषः।। मित्र
साधारणे कार्ये मित्रायत्ते फलोदयो अनुग्राह्ये च पीड्ये च मित्रे योवसहञ्जेत्। मित्रस्यात्मनश्च साधारणं समानफलोदयं कार्यं य
स्मिन् कार्ये तथा मित्रायत्ते फलोदये पत्तथा।।नुग्राह्ये च मित्रांतरे विजिगीषुयुद्धे नियोजयेत् स्व स्तकरापेक्षी यथा चांडालः स्व
स्तकरबंधभक्षत्वात्। अपेक्षते तथा विजीगिषुर्यातव्यशत्रोर्वधमपेक्षते। सहाध्यागतदंडोपनजशत्रोरपि वधमप्यक्षत एव
अतश्च दृष्टांतात्र यंतीति चांडालवद्विजीगीषुर्नयेत् प्रापयेत्।। अभ्युत्थितं कोपभयात् अभ्यासे तु रियो बलं। वासयेत् कर्षापेवै
व दुर्गकंटकमर्द्दनैर्यातव्य दुर्गकंटकमर्द्दनैः। — व्याटविकाख्यकंटकमर्द्दने जन्मदूनये षष्ठो ह्रस्वं भवत्विति। आटनिकवलो
पादानकालमभिधातुमाह।। निस्समाटविकं सोन्यं दुर्गकंटकशोधनैः। परदेशाप्रवेशे च पुरः कुर्वीत पंडितः। आटविकंसे
न्यं निति सर्वदा दुर्गे यातव्यसंबंधनि कंटकशोधने ह्याटविकादिकंटकमर्द्दने परदेशाप्रवेशे यातव्यजनप्रदेशे च पुरोग्र
तः कुर्वीत पंडितो विजीगीषुः पांडित्यं चात्र मरणात्मकभावस्य गोपनमिति। उपसंहरवाह। एतन्मौलादिषड्विधं चतुरंगब

लंस्मृतंषडंगमंत्रकोन्नाभ्यांपदास्यश्वरथद्विपैः। इत्युक्तेनप्रकारेणमौलादिषद्भेदंषट्प्रकारंतुरगबलंस्मृतं। पदास्यश्वरथ
द्विपैरंगैरेभिरेवषडंगंभवति। मंत्राणानकोत्राणंगेनचसहमंत्रकोत्रापारंगत्वमितिचेत्यथाचांगैः रात्रवः क्षयंनीयंते। त
थामंत्रेणाकोशेनचेति॥ इतिषड्विधमेतद्विपथायोगंबलंबली॥ सुनिश्छिद्रंप्रतिव्यूहपात्प्रतिवलंप्रति। इत्युक्तक्रमेणषव
ड्विधंबलंभाविबलमेतदनंतरोक्तंहिस्फुटंयथायोगमितियस्यवलस्ययेनबलेनसहयोगोयुज्यते। कर्तुंत्राणबलसंयत्नं
सनिश्छिद्रं इतिरंध्रंयेनपरस्यतेकासेभवतितन्निर्गतंतस्मिन्प्रतिव्यूहेति। पररचितव्यूहस्यप्रसनीकभूतंव्यूहंविरचय्य
पात्परबलंप्रतीति। योगस्यविजानीयात्सर्वरत्नादिनानृपः॥ हताहतप्रचारंहिसम्यक्सेनापतेस्तथा। अथानंत
रोक्तस्यषड्विधस्ययोगसंबंधंस्वकीयैः परकीयैर्वासहसर्वमशेषंविजानीयात्विजिगीषुर्मंत्रादिनांगुढपुरुषप्रणिधा
नान्नृपोणज्ञातयाहताहतमितिप्रतीतं। स्वामिहतमहतंवाप्रचारंचकः क्वप्रवर्ततीतिगत्यागम्यादिकंतच्चविजानीयात्।
साधुयथाभवतितथासेनापतेरपीतिसकलबलसमुदायः सेनातस्याः पतिः तस्याः हताहतप्रचारादिकंजानीयादितिसं

96

भवतियथा

बंधः॥ सेनायालक्षणामभिधायसेनापतेरपिसमस्तश्लोकपरिकल्पितकुलोद्गतमुभयकुलविशुद्धान्वयोत्पन्नंजानपदंस्वजनपरा
भवमंत्रतत्त्वपंचांगमंत्राभिज्ञंमंत्रिसंमतमिति। मंत्रिणामभिमतंस्वाभिहितत्वात्तदंडनीतिशास्त्रस्यप्रमोक्तारंअध्येतारंअध्येता
रंचसाधुपर्योभवति॥ सचसत्त्वक्षमाधैर्यमाधुर्यार्यगुणान्वितं। प्रभावोत्साहसंपन्नमाजीव्यमनुजीविनामितिप्रतीतं॥ निसाका
रणावैराणामकर्त्तारमनाविलं। शुभानुबंधिकर्मणामस्मामित्रबंधुश्रुतां अत्रानाविलमित्यस्तव्यंशेषंप्रतीतं। आरोग्यंव्यायतंशू
रंसागिनंकालखदिनंकल्याणाकृतिसंपन्नंसत्त्वसंभाव्यपराक्रमं। व्यायतमितिप्रांशुःशेषंप्रतीतं। गात्राश्वरथचर्याश्रविक्षितसु
जितश्रमं॥ खड्गयुद्धनियुद्धेषुदृग्घ्रचक्रमणाक्षमं। नियुद्धंमल्लयुद्धंशेषंप्रतीतं। युद्धभूमिविभागज्ञं॥ सिंहवद्दृढविक्रमं। अदीर्घ
सूत्रंनिस्तंद्रंउत्थापनममर्षणं। निस्तंद्रमनालस्यंशेषंप्रतीतं॥ हस्त्यश्वरथशस्त्राणांसम्यक्कूलक्षणावेदिनं। नरांतरविवेकज्ञं
कृतज्ञमनुकंपकं। इतिप्रतीतंधर्मकर्मसमायोगकुशलंकुशलमनुगं। सर्वशुद्धक्रियोपेतंशुद्धंतत्सरिकर्मणि। धर्मसमायोगमिति
कुशलमितिधर्मेणासमायोगःसंबंधोयेषांकर्मणांतत्रकुशलं। शेषंप्रतीतं। स्वभावविचित्ततत्पायुक्तमाशुद्धंदंतिनां॥ तन्नाम्ना

चापि। कर्त्तारं न द्विधानोपपादकं। इति विधानं हस्त्यश्वादीनां वादनं ॐ दनिकात् तदुपपादकं द्रोषं प्रतीतं। देशाभावास्वभावत्वां लपितं मुढ
ढस्मृतं। निद्राप्रचारकुद्रालंद्र कुनक्षाननिश्चितो इति प्रतीतं। देशाभावास्वभावत्वं इति। उदयास्तमयतानं नक्षत्राणां ग्रहैः सदादि
देशा मार्गवितानं संपन्नं तन्निषेवितं। इति प्रतीतं। क्षुत्पिपासाप्रहृष्टा धन्वीनवातो ग्रहृष्टिभिः। अनाहितभयत्रासं सस्यसाभव
प्रदं इति प्रतीतं। भेतारं परसैन्यानां दुःसाध्यां हि न निश्चयं। मन्नानां व स्वसैन्यानासाधुविघ्नं भनमिति प्रतीतं अवस्कंदाभियोक्तारं
चेतार सैन्यकर्मणां चरद्भूतप्रपंचत्वं महारंभफलो यं मां अवस्कंदः सौम्यकादिकः तत्र गोमारं रक्षसंकीर्णो प्रदेशोऽवस्थानं बलस्यव्य
सनमुच्यते॥ तथा दीर्घाधानपरिश्रांतं क्षुत्पिपासाहितश्रमां व्याधिदुर्भिक्षमरकया ऽर्तितं दस्युतियुतं। पंकपांशुतलक्लिन्नं व्यस्तं
पुंजीभूतं पथि। प्रसुप्तं भोजनव्यग्रं अभूमिष्टं असंस्थितं। घोराग्निभयवित्रस्तं वृष्टिवातसमाहितं॥ एवमादिषु जातेषु समाकुलं॥ जातेषु
स्वसैन्यसाधुसंरक्षेत् परसैन्यं च घातयेत्॥ इति प्रतीतं॥ कूटयुद्धविकल्पानभिधातुमाह। विशिष्टो देशकालाभ्यां भिन्नारिप्र
कृतिर्बली। कुर्यात्प्रकाशयुद्धं तु कूटयुद्धं विपर्यये। देशकालाभ्यामिति। इष्टां देशाबलेन च बतपातव्यवसायपेक्षया विशिष्टा

97

धिकः भिन्नादिप्रहृतिरिति। भिन्नापातव्यस्यमित्रादि प्रहृतयोयेनबली यः उपन्वितशक्तित्रयएवंभूतोविजीगीषुप्रकाससयुद्धंकुर्यात्
विजयस्यासंदिग्धत्वात्। कूटयुद्धन्तुवक्ष्यमाणलक्षणंविपर्ययेपूर्वोक्तस्यान्यथात्वेकुर्यादितिसंबंधः॥ तेष्वव्यसनकालेषुपरहन्या
त्समाकुलां अभूमिष्ठं स्वंस्वभूमिष्ठंतत्भूमौ चोपजायतः। तेषुव्यसनकालेष्विति अनंतरोक्तवलव्यसनकालेषुपरंहन्यात्समामि-
सा। अभूमिष्ठं स्वभूमिष्ठंतत्भूमौचोपजायतः। तं व्यवस्कस्कालेष्विति अनंतरोक्तवलव्यसनकालेषुपरंहन्यातकुलमितिप्रती।
तं। अभूविष्टंयुद्धव्यायामयोरयोग्याभुद्धयोग्यभूमिस्थितस्तं। तद्भूमौपातव्यान्नकुलभूमौवा उपभायः प्रहृतिभेदस्त
स्मात्॥ पुरस्ताद्दर्शनंदत्तानल्पसहतनिश्चयं। पश्चात्हत्वाप्रवीरेणवलेनोत्सपहेगिना। पुरस्ताद्दर्शनंदत्तोयोद्धुमितिदर्शनंस्व
सैन्ये दत्वा तन्नसहतनिश्चयमितियेनविजीगीषुनेनदर्शनंदत्तंतत्नसहतोनिश्चयोयेनपातव्येनतंपश्चादिति। गत्वाम
वीरेणप्रसहमवलेनवेगवताबलेनहन्यादितिसंबंधः पश्चाद्धास्वकुलीकृत्ससमाकुलंकृत्वापूर्वोक्तः सारणावलेन
हन्यादिति। पश्चात्पूर्वाभिपाताभ्यां पश्चात्पूर्वाभिघातौ व्याख्यातौ इत्येष्यौ। कुपोधनेनयथावामाताबलंप्रदर्श्यवामा-

तोहान्यादिसर्यः। पातव्यपाने कूट श्रुकं चोषंप्रतीतं। व्याश्वत संसिद्ध कर्मोणां सिद्धकर्मनिर्वर्वितं। पराभवे घनिर्वियांश्रीमद्राज्ञा
र्थतत्सरं। इतिप्रतीतं इस्येवलक्ष संगेयेतं कुर्वीत धागिनीपतिं। ध्वनिनी च सदोद्युक्तः सगोपायेद्दिवानिशं॥ इतिप्रतीतं॥ नघट्टिव
नदुर्गेषु पत्रभयंभवेत्। सेनापतिस्तत्र गच्छेद्व्यूहीकृतैर्बलैः। व्यूहरचितैर्बलैरेषंप्रतीतं। स्कंधावारप्रयाणमभिधातुमा
ह। इत्युक्तं। नायकः पुरतोयायात् प्रवीरपुरुषावृतः। मध्येकलत्रंस्वामी च कोशः फल्गु च यद्बलं। नायक इति जातावेकवचनं। स
त्स्वबलनेता नायकः सप्रवीरपुरुषावृतः। पुरोग्रतो यायात् मध्ये स्कंधावाकलत्रमंतःपुरादि ससकलपुत्रदारं स्वामी च विजि
गीषुः कोशः समुद्रपफल्गु च यद्बलमसारं च यद्बलं तत्सर्वं मध्ये यायादिति॥ पार्श्वयोरुभयोरश्वानां पार्श्वयोरथारथानां पार्श्व
योर्नागानां चाटवीबालां इति प्रतीतं। पश्चात्सेनापतिः पुरस्कृत्य क्षितीश्वरं। यायात्संनद्धसैन्यो घखिन्नानाश्वासयत्शनै
। इतिप्रतीतं। प्रयोणप्रयोगमभिधातुमाह। मायात्व्यूहेन महता मकरेण पुरोभवेत्। श्येनेनोद्धृनपक्षेण बलवत्सूक्ष्मनीकेनत
पाव्यूहेन चाधीरवज्रपाधीरा॥ वज्रेअथे यस्मात्तयावेति॥ पश्चाद्भयेतत्काकटंपार्श्वयोर्वज्रसंज्ञकं। सर्वतः सर्वतोभद्रंभावाहा

98

धीरवज्रं प्रकल्पयेत्। पश्चाद्भयेत्तु शाकटं व्यूहं प्रकल्पयेत्॥ पार्श्वसे॥ भवेदुग्रसंसक्तं व्यूहं सर्वतो भवेत् सर्वतोभद्रं व्यूहं प्रकल्पयेत्
।इति संबंधः८। कंदराद्रिशैलगहने निम्नगावनसंकटे दीर्घाध्वनि परिश्रांतक्षुत्पिपासाहितक्लमं ।कंदरा पर्वतदरी शैलगहनं सर्वतः
प्राचुर्यं निम्नगा नद्यः वनानि वृक्षगुल्मादिभिः दुर्गाणि तैः संकटमभिधत्ते माह। पुरस्ताद्विषतो देशे पश्चाद्धन्यात्प्रवेगवान्। पुरः
पश्चाच्च विषमे एवमेव तु पार्श्वयोः। पुरस्ताद् अग्रतो विषमे दुर्गमे देशे पश्चाद्धन्याद्वेगवान् विजिगीषुः पश्चाच्च विषमे पुरोऽग्रतो ह
न्यादेवमेव तु पार्श्वयोरिति। वामतो विषमे दक्षिणातो हन्यात् विषमे वामतो हन्यादिति प्रथमं योधयित्वा हार्ष्यमैत्राटवी
बलैः। श्रांतं संतं निराक्रंदं हन्यादश्रांतवाहनः प्रथमं पूर्वमेव हार्ष्यमैत्राटवीबलै योधयित्वा युद्धं कारयित्वा श्रांते जातश्रमां ते
विषमं तिराक्रंदं मित्रबलाहितं मित्ररहिते देशे च एकं च्यते। हमादश्रांतवाहनः। इति प्रतीतं। दूष्यामित्रबले वापि भंगं दत्त्वा प्रयत्न
वान्। जितामवेति विश्वस्तं हन्यात्छन्नव्यपाश्रयः॥ दूष्यामित्रबलैः कारणभूतैः भंगं दत्त्वा प्रयत्नवानिति आत्मनः प्रहृति
प्रयत्नो जितमेवेति विश्वस्तं प हन्यात्छन्नात्छन्नव्यपाश्रयो वनादिच्छिन्नः स्कंधावारपुरग्रामसस्यसार्थप्रजादिषु विलोपनपरानी

कमप्रमत्तो विनाशयेत्। स्कंधावारपुरग्रामसस्यसार्थप्रजादयः प्रतीताः तेषु विलोपनव्याधूतमनीकं परं स्वयमप्रमत्तो विनाशये

दिति। फल्गुसैन्यप्रविच्छन्नं हत्वावासारबहुलं॥ मर्दयंतं तद्विलोवेगसेदुस्सिंहवत्। फल्गु असारं तेन प्रविच्छन्नं सारबहुलं

हत्वा तेन तद्विलोपे फल्गुवलिविनाशे समासक्तमासक्तिंगतं हन्यादुस्साहिंहवदिति प्रतीतं। मृगयासंप्रसक्तं वा हन्यात्सत्रव्यपा

श्रयः। अथवा मोग्रहात्तव्यात्तल्लक्षमार्गवचनात्। मृगयां प्रसक्तं पापर्द्धौ सत्रं वा हन्यात् सत्रव्यपाश्रयो वनादिसंलीनः। अथ

वा गोग्रहा दूरलुब्धा गोग्रहं कारयित्वा पाशग्रोराद्बहिस्तथाकरणाभूतयातल्लक्षसंयोगैर्हन्तद्दृष्टिं मामग्रबंधनात्। हन्यादिति ए

प्रतीतं। अवस्कंदभूयाद्वा त्रिंप्रजागरहतश्रमं। दिवाप्रसुप्तं वा तत्सौप्तिकविधानवित्। हन्यादिति संबंधः। सौप्तिकलक्षणं च।

चातं रसेव वक्ष्यति। सपादकोशावरणैर्भागैः कुर्यात्सौप्तिकं। आश्वैरग्निजवोपेतैः नरैर्वा षड्गपाणिभिः। पादानां चर्ममया

कोशाः। आवरणास्तत्रसंनाहास्तद्युक्तैर्नागैः सौप्तिकं शुभवलविनाशं कुर्यात्। अश्वैर्वा अग्निजवोपेतैरतिवेगिभिर्नरैर्वा षड्गपा

णिभिः सौप्तिकं कुर्यादिति संबंधः। प्रतिसूर्यामहावातं हन्यात्संमीलितेक्षणं। इत्येवं कूटयुद्धेन हन्याच्छत्रूंल्लघुस्थितः। प्रतिसूर्यम

११

हावातप्रति संमीलितेक्षणां। हन्यादिति कूटेन युद्धेनारिलघूथ्यित इति प्रतीतं। नीहारस्तिमिरं गावः श्वभ्राग्नि चनति म्नगाः। वदंति
रम्भुमित्यादि छसदं प्रकीर्त्तितं। सह्यिमानं त्रापति। छादयतीति छत्रं। नीहारो धूमिकान्योषं प्रतीतं। उपसंहरन्नाह॥ ॥
साधुप्रमत्तो व्यवसायवर्त्ती येन प्रकारेणापरं निहन्यात्। चरैः समावेदितस्वचारत्त्वां केनातेनैव ततो ऽप्रमत्तः नियतमुपहन्यात्
कूटयुद्धेन त्वाम्रनृतिरयति हि धर्मछद्मनात्रात्रुनाशः। अचकितमिच सुप्तं पांडवानामनीकं निशि सुनिशितशस्त्रो द्रोणसूनु
जघान॥ साधु यथा भवति तथा ऽप्रमत्तो व्यवसायवर्त्तीन्यवसाये स्थितः। येन प्रकारेण कूटयुद्धादिनापरं विहन्यात् विजीगी
षुः। चरैः समावेदितस्वचारः शत्रुप्रचारः त्वां केतत्त्वां कां कुर्वीत। ततो मा तथ्यान् तेनैव प्रकारेण प्रतीकारं कुर्वीत अप्रमत्त इ
ति कूटयुद्धैः शत्रुवधप्रायं भवती सा शंक्याह। निपतंतनिश्चयेन उपहन्यात् उपेत्स विनाशयेत्। शास्त्रूसकूटयुद्धादिभिरिति
शेषः। हि यस्मान्न तिहयति विधेर्न छस्तनाशात्रुनाश इति। वेदार्थः। अत्र दृष्टांतमपि दर्शयन्नाह। अचकितमिव सुप्तं पांडवाना
मनीकमिति॥ ॥इति॰ सेनापतिप्रचारप्रयाणव्यसनरक्षणं कूटयुद्धविकल्पाख्या एकोनविंशः सर्गः॥१९॥ ॥

कूटयुद्धमभिधायात्रप्रकारयुद्धं प्रति पादयितुं बलांगानां कर्माणि युद्धादि चतत्र हस्तिकर्मैव श्लोकत्रयेण दर्शयितुमाह। प्रयाणपू
र्वयायित्वं वनदुर्गप्रवेशनं। अहतानां च मार्गाणां हतानां च प्रवर्त्तनं। प्रयाणे पूर्वं भूषणं यायित्वं वनदुर्गप्रवेशनं परेषां त्रासजन
नार्थं हस्तिनां कर्म हर्म्य भंजनसमर्थत्वात् अहतानां च मार्गाणां तीर्थानां च -- महाकायत्वात्। तायावतारसंतारणे कांगविजय
स्तथा। एकेनैव हस्त्यंगेन परसैन्यं गीयते इति अभिन्नानां परानीकानां भेदनं हस्तिघटाप्रेरणात्। भिन्नानां स्वसैन्यानां विक्षिप्तानां
संग्रह एकीकरणं हस्तिघटाभिरेव विभीषिकाविघातश्च प्राकारभंजनं कोशानीति भर्पत्राणां हस्तिकर्म प्रचक्षते। विभीषिकां त्रा
सूणां मयोत्पादनां प्रचक्षते पूर्वाचार्या इति। रथकर्माभिधातुमाह। तुरंगस्य सैन्यस्य निषेधो लक्षणं भेदस्य भिन्नसंधावं रथकर्म
चतुरंगस्य परानीकस्य निषेधः। प्रतीषेधः बलरक्षिणं। अनुमानापसरणे श्रीघ्रकार्योपपादनं। णस्वकीयबलरक्षणं अभिन्न
संधानं हस्तिकर्मवन् द्रष्टव्यमिति रथकर्मैवतत्। वनदिग्मार्गविधेयो वीवधासारलक्षणं। अनुपानायसरणे शीघ्रकार्योपपाद
नं। वनानां दिशां मार्गाणां विधं योनि स्वरूपर्ण अश्वकर्मेति संबंधः। वीवधासाररक्षणमिति प्रतीतं॥ अनुपानायसरण इति परसैन्यस्य

त्रासोत्पादनार्थमनुपश्चाद्योनमनुयानंमंगदर्श्नेनेनपरवलाना ह्मयांतिहंतुरयसरपरणं त्रीघ्रंकार्योपपादना मित्रीघ्रसंपादनीयानांकार्या
णामुपपादनं चा श्वकर्मा दीना नुसरणंपतिकोटीनांजघनस्यच। इत्स श्वकर्मोसते श्वसर्वदात्रा स्त्रधारणं। दीनानुसरयामितिदीन्मु-
नुकंपनीयं। तसरबलंनस्यदूरापक्षंसंरणार्थमनुपश्चाद्गमनमनुसरणंपत्तेः कीटीनामिति उभयपक्षस्थितवलानांजघनस्याचनि
एष्टभागस्थितबलस्य इत्स श्वकर्मपक्षे श्वपदातिबलस्यसर्वदात्रा स्त्रधारणंकमेति। शोधनंकूपतीर्थानांमार्गाणांश्चिविरस्यच। व्यंव
सादि चयत् किंचित् विहितंयं विश्वकर्मवत्। कूपतीर्थशोधनंखननक्रियामार्गाणांशिविरस्येति स्कंधावारस्थानस्ययवसादिषुपल
लादिषुआदियहणात्काष्टकंटकत्वा खादिषुयत्किंचित्कर्मविहितंयं विष्टिकर्मतत्। विष्टयस्तुकर्मकराउच्यंते। वलंस्थान्यमिधानु
माह। जातिस्थानंवयस्थानंवयस्थानंप्राणिनामर्मवेतिगिता। तेजः शाल्यमुदग्रत्वंधैर्यंसाधुविधेपिताजातिरिप्रत्येकंयथाचित्ताशु
द्धानयथा। मनुष्याणांजातिविशुद्धकुलविशुद्धत्वंहस्तिनांभद्रादिका अश्वानांसुभूमिजत्वंरथानांसारदार्व्यादिकारघटितत्वंच
सत्वमतमत्वंवयश्तिर्सवयस्तरुणात्वमित्यर्थः। स्थानमुसातिस्थानस्योतत्वंप्राणितावलवत्वंवर्मचारीरिणामाशुना। वेगितावेग

बलं। तेजस्तैक्ष्ण्यं त्रास्यमिति। स्वविषये हृष्टवियता। उदग्रत्वमुन्नतत्वं स्थैर्यं स्थिरत्वं रचलत्वं साधु विधेय साधु यथा भवति तथा योक्तृका
रिता। सुव्यंजनाचारवता पक्षस्थ्वरथ दंतिनां मि॥ इति लक्षणमेतेन युक्तान् कर्मसु योजयेत्। त्रासनानि व्यंजनानि लक्षणानि
आचारश्च येषां तेषां भावः पक्षश्च रथ दंतिनामिति लक्षणमेवं प्रकारं लक्षणं भवति एतेन लक्षणेन युक्तान् कर्मसु योजयेदि
ति प्रतीतं। इदानीं तु बलानां गुणमभिधातुमाह॥ ॥सस्थूलस्थाणुवल्मीकवृक्षगुल्मापकंटका। सापसारा पदातीनां भू
र्नातिविषमा मता॥ अभिमता या दानीनां शुद्धा ये सर्वः। स्थूला स्थाणवस्कंधाच्छिदः छिन्नवृक्षा वल्मीक वृक्षगुल्मादि प्रती
तास्तै। सह वर्त्तत इति। अपकंटका सापसाराः। सदा यसार भूम्या वर्त्तत इत्नीति भूमिनातिविषस्य मंत्री अभिमता। पदातीनां शु
द्धा ये सर्वः। अश्वानु षितपंका च सापसारा व वाति भूः। अल्पवृक्षो पलां पस्यां सा क्षिगुयाप्रः। घनी सकल भूमि प्रयुक्तत्वात्। विर
दास्फोटनरहिता स्थिरा अविदारणानि त्रांकंदरा सूक्ष्म पाषाणरहिता स्थिरा अविदारणानिः पंका कर्दमरहिता सापसारोऽ
पसरणप्रदेशा युक्ता एवं भूता वाजिनी भूरनुकूला इति। रथानुकूलां भूमिमभिधातुमाह। निस्थाणु वृक्षालं पंकातिर्वल्मीकोप

(0)

लासमा। केदारवृतनिघ्नवृक्षगुल्मविवर्ज्जिता इतिप्रतीतं। निरूघामानिर्दरणा खुरचक्रंमयाक्षमा। स्थिराचक्रसहाचैवरथभूः
संप्रकीर्त्तिता। इतिप्रतीतं। गजानुरक्तां भूमिमभिधातुमाह। मर्दनीयतरूच्छेद्यव्रततिः पंकवर्ज्जिता। निर्दरागम्यशैला च विषमा
गजमेदिनी॥ विषमा भिन्नोन्नतत्वात् त्रौषं प्रतीतं॥ युद्धे राजस्थानमभिधातुमाह। जयार्थी नृपतिस्तिष्ठेत् दूरं गत्वा प्रति-
ग्रहे। भिन्नं च प्रतिगृह्णीयात्। न हि युद्धेन हि युद्धेन तं विना। विजिगीषुर्वक्ष्यमाणलक्षणानां धनुषां व्यूहस्य लक्षतो द्रातेग
त्वा तिष्ठेत्। परैरूपहृतं स्वसैन्यं गृह्णातीति राजाप्रतिग्रह विक्कलं धारयतीति भिन्नं साधारणो यस्मात् अप्रतिग्रहस्थानस्थितो।
राजा न वुध्येत युद्धे कोश्राः गजेष्यारोपितः कार्यः सुरक्षो भवतीति न्याघ्रपानं तुरंगोष्ट्रादीनां तैरधिष्ठितरक्षासौ कर्याष्टमेवय
त्र राजा तत्र कोश्राः हि यस्मात् कोश्राधीना हि राजानः य[illegible]कोश्राः स एव राजा भवतीत्यर्थः। युद्धे कोश्रामभिधातुमाह। प्रसंगे
कर्मणि ह्यते श्लाघ्यमानकृतादरः। योधेभ्यस्तु ततो दद्यात् को हि दातुर्न युध्यते। प्रसंगे अभिनवे कर्मणि शत्रुवधादौ ह्यते
निवर्त्तिते स्वयोगादिभिः श्लाघ्यमामोवर्णयन् कृतोदरः कृतसन्मानः योधेभ्यस्तातादद्यात्। स्वकोशं प्रपच्छेत्। यस्मा

नकोनामपुरुषोनयुध्येत अपितुसर्वोविबुध्येत एवंदानसंख्यासमभिधानुमाह। दद्यात्प्रहृष्टे नियुतं। वर्षाणांराजघातिने। तदर्द्धं
तत्सुतवधेसेनापतिवधेतथा। शत्रुवलेयोराजातद्घातिनेतद्विनाशःकार्यार्द्धेतराच्छिरसिसमानीतेघर्वाणां आहितद्रविशेषा
नियुतंलक्षंप्रहृष्टोदद्यात्। तदर्द्धं नियुतार्द्धं पंचाशत्सहस्राणीत्यर्थः। तत्सुतवधेसेनापतिवधेतदेवप्रतीगणांमुख्यस्य
शतंशतगुणंवधे। तदर्द्धंकुंजरवधेप्रधानस्यंदनस्यच। प्रवीराणांतु प्रह्व एवीराणांयेमुख्याःतेषांवधेशतगुणंदशशतसह
स्राणिदद्यादितिसंबंधः। तथातदर्धंकुंजरवधेपंचसहस्राणीत्यर्थः। स्यंदनवधेरथस्यसार्द्धंसहस्रद्वयंदद्यात्। साहस्रोश्व
वधेइत्यर्थः। द्विमुख्यइतिप्रतीतं। शतोविंशतिकंसर्वमपुष्यस्यापीति भोगोजाविकासद्विगुणाःकार्यः। स्वयोधानांहतययो

हसुवर्णा

न।कर्मणांकुर्य्यंयस्यआयुधाचरणादियोजयतितस्यैकस्यद्वयेमिति। दद्याद्वस्तुनुरूपंवाहृष्टोयोधान्प्रहर्षयन्दद्याद्वस्त्व
नुरूपंचेति। वस्तुकार्यंतत्पंचाशतंदद्यात्। हृष्टोयोधांश्चहर्षयेत्सर्वंदद्यादितिसंबंधः। व्यूहरचवलांगानामसंकुलार्थंपर
रामभिधानुमाह। पंचारत्निर्धनुस्तस्मिन्धन्वितंस्यापयेयुधि। त्रिगुणोश्वगजरथैयोयोहस्तैःस्तैःपंचभिःकल्पितंधनुर्देशामानंत

102

स्मिन् धनुषि पंचारत्निप्रमाणं भूभागमित्यर्थः। धनुर्द्वंद्वं धन्विनमुपनयेत् युद्धार्थं युधि संग्रामं त्रिगुणे धनुषि पंचदशारत्निप्रमाणं संस्थापयेत्कुं
जरथौ नुयोज्यौ। पंचदशसु पंचदशसु पंचविंशारत्निप्रमाणे भूभागे इत्यर्थः। अश्वान्तरस्तु पुरुषस्तुरंगस्त्रिशमान्तरः। कुंजरस्यंदनश्वेवस्म
तो पंचशमांतरे। शमश्चतुर्दशांगुलप्रमाणं सत्समानं अपरस्मात् पुरुषांतरालः पुरुषः कार्यः। चतुरंगस्त्रिशमांतर इति द्विचत्वारिंशदंगु
लांतरो भवति कुंजरस्यंदनश्वेवस्मतो पंचशतांतरा विति। कुंजरात्कुंजरः समसंगुलांतरः कार्यः तथा स्यांदना स्यंदनश्च। उक्तां
तरालापवादमाह। तथा च खलु युध्येरन्यस्य श्वरथद्दंतिनः। यथा मवेन्न संबाधो व्यायामविनिवर्तने। विग्रहे आयासो युद्धे प्रसर
णं व्यायामः। तथा विश्रामार्थमपसरणं विनिवर्त्तनं। तथा संबाधसंकीर्णता न भवति। तथा युध्येरन् विस्तीर्णायां रणभूमौ उक्तप्रमा
णादधिकमपि अंतरालं कार्यं। संकीर्णायामिति भावः॥ ॥असंकरेण युध्येत संकरं संकुलावहः। महाकुलयुध्येत संश्रयेरन्महा
गजान्। संधारणं संधारः। अन्यस्थानविक्षेपणं असौ संधारः संकुलावहः। किं मुक्तं भवति आकुलत्वात् महाभवसतो संकरेण युध्येरन्
। महा संकुलयुध्येत संश्रयरन् महागजानीति। आकुलत्वेनाथेपसश्वरथा महागजानाश्रयेरन् आकुलत्वापनोदार्थमिति। भावः।

बलानांप्रतियोधविधानमभिधातुमाह। अश्वस्यप्रतियोद्धारा भवंति पुरुषास्त्रयः। इति कल्प्याः सुपंचानांविधेयाः कुंजररस्य चापादरोयाश्च
तावंतः पृष्ठतः पुरुषादन्यापंचकार्याः एवमेकस्यनागस्यपंचाश्वास्त्रिंशत्‌अश्वपुरुषाभवंतीति। एकनागपरिकल्पनेयंविधानमिति। नाग
स्यकथितंस्यंदनस्यचापा [illegible] रोपास्तावंतः अनीकमितिविज्ञेयमितिकल्प्यानवद्विपाः। तस्यानीकस्यरंध्ररूपंचचापंचप्रचक्षते
अनीकंव्यूहांगंइत्यक्तक्रमेण अनश्वपदाति पुनर्न्यक्तोवद्विपाः अनीकमपिकल्प्यकल्पनीयास्तथाचामीकरस्यरंध्रंच अनीकाना
मंतरालानि पंचचापानि पंचविंशत्यरत्निप्रमाणानिभवंतीत्यर्थः। इत्यनीकविभागेनस्थापयेद्व्यूहसंपदः। उरस्यकक्ष्यपक्षांश्चतु
ल्यानेतान्प्रचक्षते॥ इत्यनीकविभागेनेतिनवद्विपपरिकल्पितेन इतिव्यूहसंपदः। वलाढ्याः। उरस्यकक्षव्यूहस्योरसिमध्येरचितं
भवति। तदुरमितिकथ्यतेकक्षायांकक्ष्यं। उरंसपार्श्वयोर्भवेकक्ष्ये अनीकेकक्ष्यास्थानयोर्भवत्वात्। कक्ष्यगोरूपांतेकक्ष्यस्याप्रभाव
त्वात्‌पक्षे अनीके एतान्‌उरस्यकक्ष्यपक्ष्याणीतितुल्यानि समद्विपसंख्यांपरिचक्षतेइति। उरःकक्षौचमध्यंद्वष्टंप्रतिग्रहः। कोटी
चव्यूहशास्त्रज्ञैः समांगोव्यूहउच्यते। उरइति उरस्यंकक्ष्यमिति। पुरस्यस्योभयपार्श्वस्थितंद्विविधमिति एकतयेष्यते। तयैकस्यंको

103

टिःपक्षयोर्वहिः स्थितमनीकंकोटिसंज्ञितं।द्विविधमप्येकतयेष्टंमध्यमिति।उरसः पृष्टतोवस्थितमनीकंमध्यंमध्यस्यापि पृष्टतेःवस्थि
तंपृष्टमुच्यते।प्रतिग्रह इतिपृष्टा स्थानीकात्‌द्विरातधनुर्व्यवहितंपृष्टाव्यवस्थितंराज्ञाव्यवस्थितंराज्ञावस्थानंप्रतिग्रहउच्यते।
इसेवंव्यूहत्रास्त्रहैःसप्तांगोव्यूहइष्यते।तद्यथाउरस्यकक्ष्यपक्षकोटिमध्यपृष्टमतिग्रहांगोरिति।इसैवंव्यू आचार्यमतान्यभिधा
तुमाह।उरस्यकक्ष्यपक्षैस्तुव्यूहोपंचप्रतिग्रहः।गुरुरेवचशुक्रस्यपक्षाभ्यांपरिवर्जितः॥।उरस्यंकक्षेपक्षेप्रतिग्रहश्चेति एवंविधो
व्यूहोविज्ञातोर्गुरोर्वृहस्पतेनशुक्रस्यमतेनायमेपव्यूहः।पक्षाभ्यांपरिवर्जितोभवति।अभेद्याःकुलजामौलाःलब्धपक्षाःप्रहारि
णः।सेनांगपतयेःकार्याःसुहृष्टप्रतिन्निपाः।लब्धकक्ष्याइतिप्रहर्त्तुंकल्पिताः।लब्धोलक्ष्योयेस्तमभिहर्त्तुंप्रारब्धमित्सर्थः।सेनांगप
तयइतिहस्त्यश्वादिसेनांगानांचतुर्णांपतयोधिष्टातारःकार्याःशेषंप्रतीतं।सेनांगप्रतिविधेयमाह।प्रवीरैःपुरुषैरन्यैस्तिष्टेयुःप
रिवारिताः।अभेदेनचमध्येयुःरक्ष्येयुश्चपरस्परेमितिशेषंप्रतीतं।फल्गुसैन्यस्ययपत्किंचितमध्येव्यूहस्यतद्भवेत।युद्धेवस्तुभ
यात्‌किंचितथायस्तज्जघनेभवेत।फल्गुअसारंसैन्यंचयत पत्यश्वरथद्विपादिकंमध्येव्यूहस्यसत्रांगस्यतद्भवेत।युद्धम

ध्यांगपरिकल्पनात्तत्रैवेति। युद्धवस्तुयत्किंचिच्छत्रावरणानिषेधौषधंजलाहारादिप्रापत्तज्जघनेपृष्ठानीके मद्भवेत्। जघनपरिकल्पनादिप
संगव्यूहएवेति। प्रतिग्रहानीकस्यैवविशेषमाह। युद्धार्हंयुद्धकुशलैर्गुडानीकंनियोजयेत्। युद्धंहिनायकप्राणंहन्यते ह्यनायकं। युद्धं
संग्रामस्तदर्हंयुद्धकुशलोविजीगीषुः वीरपुरुषः कल्पितंछत्रचामरादिरहितंसुसंनद्धंगुडानीकमित्युच्यते। तत्रस्थोराजानरैर्नचिह्न्य
ते। ततश्चरक्षितोभवति। हि यस्मात्युद्धंनायकप्राणंविजीगीषुः स्वप्राणभूतोहन्यते। तदनायकंतत्वप्रतिग्रहस्थानएवतद्भयात्युध्यंते
इतिभावः। दंडकाररहितान्व्यूहानभिधातुमाह। व्यूहेनुपृष्ठमचलकस्यअश्वरथदंतिभिः। अनुपृष्ठमितिवीप्साद्रष्टव्या। अनुपृष्ठमनुपृ
ष्ठंपत्त्यश्वरथदंतिभिः। विस्तीर्णैरयंव्यूहोअचलनामकोभवति। तद्यथापत्तीनांपृष्ठतोश्वाः अश्वानांपृष्ठतोरथाः। रथानांपृष्ठतोदंति
नंअचलत्वंचसर्वेषांपृष्ठतःस्थितैर्दंतिभिरितिभवति। उरसिस्थापयेन्नागान्प्रचंडान्हयांश्चपक्षयोव्यूहोमध्यमेदीसकार्तितः। मध्यं
शत्रुबलस्यभिनत्तीति। मध्यदेशेहयानीकंरथानीकंचकक्षयोः। पक्षयोश्चगजानीकंव्यूहान्तर्भेद्ययंस्मृतः। परानीकमंत[illegible]स्थितैर्ह
स्तिभिःदंतेभिनत्तीत्ययंव्यूहोतभिश्चितिबलांगानांकस्यचित् अभावेव्यूहविधौविधेयमाह। रथस्थानेहयान्दद्यान्पदातींश्चहयाश्र

104

ये॥ रथाभावे च मतिमान् भागानेव प्रकल्पयेत्॥ रथस्थाने हयान् रथाभावे सति हयाभावे हयाश्रये हयस्थाने पदातीन् रथाभा
वे नागानेव दद्यादिति सर्वत्र इति प्रतीतं। बलानां बाहुल्ये विधेयमाह। विभज्य प्रक्षिपेद्व्यूहे पत्त्यश्वरथकुंजरान्। यदि स्याद्दंडवा
ल्पं सर्वावापुः प्रकीर्तितः। अनीके पत्त्यश्वरथकुंजरान् विभज्य साकारे वा व्यूहे प्रक्षिपेत्॥ यदि स्याद्दंडवाहुल्यं बलप्राचुर्यं च व्यूह।
अववेः प्रकीर्त्तितः। अधिकबलानामावपनात्। प्रक्षेपणात् साकारव्यूहानां तद्भेदानां चोद्देशमभिधातुमाह॥ मंडलासंहतो भो
गो दंडश्चेति मनीषिभिः। कथिताः प्रकृतिर्व्यूहा भेदास्तेषां प्रकीर्त्तिताः। मंडलश्च असंहतश्च मंडलासंहतौ वक्ष्यमाण॥ लक्षणो दंभा
गो दंडश्चेता विवक्ष्यमाणलक्षणा एव एते चत्वार एव मनीषिभिः प्रकृतिर्व्यूहा विकृतिरहिताः प्रकीर्त्तिता दंडादिव्यूहानां स्व
रूपमभिधातुमाह। तिर्यग्वृत्तिस्तु दंडः स्यात्। भोगोऽन्वावृत्तिरेव च। मंडलः सर्वतोवृत्तिः पृथग्वृत्तिरसंहतः अवस्थितिवर्त्तनं स्या
त् तिर्यग्रूपस्यासौ दंडः दंडस्य वामाद्यादिमस्य वा दक्षिणभागावस्थित तस्य तिर्यग्वृत्तिर्भवति। तां दृष्ट्वा स्वेतद्दंडस्यै भवतीत्स मूलस्य
र्थः। तद्यथा पक्ष १ कक्ष्यं उरस्य (कक्ष पक्ष) भोगत्वान्नवृत्तिरेव च। भोग इति सर्प भोगकारत्वात् स चान्वावृत्तिताव दंडस्य व्यूहसर्प

स्तुपक्षाभ्याम विपर्ययमेदृसर्थः।सएवदंडःपक्षाभ्यांअतिक्रांत ५

भोट। प्रतिग्रह। गस्यैवेत्सर्थः।तिर्यक्वृत्तिविलिखितोपिगकृद्वेदृष्टव्यः भागो व्यूहः॥ ८।८। ग्र। कथ्येमंडलः सर्वतोवृत्तिरितिमंडलाका
रेसर्वतोमुखत्वात्सर्वतोमुखइतिनद्यथा।कउक।संहताकारे व्यूहेष्टथक्वृत्तिरसंहतइति।अन्तानीकांतरालात्पृथक्वृत्तिरव्य
वहितेसर्थः।नद्यथा। एम। कउक। असंहतो व्यूहः दंडप्रकृतिभेदानांव्यूहानभिधानुमाह।प्रदरोदृढकोसह्येश्चापभूखक्षि
रेवचच।स।ध।प्रति। प्रश्न। दृश्चक्रस्येनोविजयंसंजयो॥विशालविजयःशूचीस्थूणाकर्णोश्वमुखः।मुखास्योविजयश्चैवदंडभे
दातुदुर्जयाः॥इसतेदंडस्यविकृतौसप्तदशभेदाभवंति।अतिक्रांतःप्रतिक्रांतःप्रतिक्रांतःपक्षाभ्यांचैवपक्षतः।अतिक्रांतैश्चअति
क्रम्यगतःप्रदरोभवति।तस्याःकारः।कक।परानीकंप्रदारयात्।प्रतिक्रांतःपक्षायांप्रतिक्रमणं।पश्चाद्गमनंतस्याकारस्तद्यथा॥
कउक।न्यदृढकः।अति।पउक।क्रांतानुपक्षास्यामपितिक्रम्यगताभ्यामसह्योव्यूहः।तद्यथा।प०पाअसह्योगंत्रये। १ ५। न्यसेतिव्यूह
त्रि। प्रा। तपस्यविपर्ययश्चापःकक्षाभ्याप्रतिक्रांतत्वात्चापसंज्ञानकार। कउकप्र। प्रतिपादनात्तद्यथाह। पउप कक प्र। ढकविपर्ययतिक्रां
तिपक्षत्वात्।असह्यविषयेप्रतिष्ठः प्रतिक्रांतत्वाततदाकारपक्षेकस्याप्रतिक्रांतिष्ठान्येविपर्ययेस्थूणाप क्षोद्विगुणोदंड

उर्द्धगुः। उरेपनकारत्वात् उरेपनाभ्यां स्थूणायेक्षः पक्षयोः स्थाने स्थूणाव्यूहे यस्यासौ स्थूणपक्षः। तद्यथा विजयो रव्येयं धनुःपक्ष इति चापव्यू
हौ पक्षयोर्यस्य धनुःपक्षः ९९ कउक ॥॥ संजया रव्येयं द्विस्थूणा इति। द्विगुणेत स्थूणाः। विशाल विजया रव्यो व्यूह॥ ≡ = = ≡ = ≡ दंड
ऊर्द्धग इति ऊर्द्धगो दंड इति एनसूचीकटाहो भवति तद्यथा पु कु रु कु पु रु क्रांत पक्ष इति ≡ – – ≡ अपंचमप्रमुखो व्यूहः। अन्योन्यविपर्यय इति
अस्य च मप्रमुखस्य विपर्यये स्यास्य स्त्रि प्रतिक्रांतः पक्षस्तात्तद्यथ कि प उ क य ≡ प्र ≡ द्वि चतुर्दंड इत्येते ह्येयाल क्षयात क्रमात्। अपंचलयस्त
द्यथा॥ = = = = = चतुर्दंडो दुर्जयस्तथा। भोगभेदानामुद्देशमाहा। गोमूत्रिकाहिसानारी चत्राकटो मकरस्तथा। भोगभेदास समाख्या
ताः स्तथापरियतेककः। एतेषां निर्देशमाह। गोमूत्रिका गवां मूत्ररेषाकारो विम्यते। अहः शरणस्थानं चाहिसारीमिधीयते। अनयो
प्रस्तारस्तद्यथा। गोमूत्रिका व्यूहः पु कु रु कु पु अहिसारी॥ तद्यथापि क उ कि प शि र्दं ड्पक्षे युगोरस्य शाकटस्तद्विपर्यये। मकरोन्यविकीर्णश्च
रोषश्च नरवाजिभिः दंडपक्षो युगोरस्यः शाकट इति दंडव्यूहस्कलपक्षस्थाने यस्यासौ दंडपक्षः युगोरस्य इति युगोरस्या उरस्यं द्विगु
णं विधेयमिसर्थः। अर्थापसाकक्षानीके विधेयः तद्यथा शाकटस्याकारः क ॥ ॥ ०० तद्विपर्यये मकर इति सर्वशाकटसंख्यविपर्ययप्रमुखो

मकरस्तथा।८= व्यतीकीर्णश्चेत्कुंजरवाजिभिरिति परिपततकारीव्यूहः।मध्येकुंजरवाजिभिर्व्यतिकीर्णे••••••••••भवतिमकरए
वेतिमंडलव्यूहभेदौ चसर्वतोभद्रदुर्ज्जयौ अष्टानीकोद्विती यस्तुप्रथमः सर्वतोमुखः मंडलव्यूहभेदौ सर्वतोभद्रदुर्ज्जयौ प्रथमः स-
र्वतोमुखः।अष्टानीकमयंदुर्ज्जयः तद्यथा।[१पृ३]असंहतभेदानभिधातुमाह।उर्द्धचंद्रकउद्धारोवज्रोभेदास्तुसंहते।तथाकर्कटशृंगी
काकपादीचगोधिका।[कउक]उद्धारः चतुः सैन्यः तद्यथा।पंचसैन्यस्तथा।[५२]कर्कटाख्यस्तथा।[६३]तथापादिक।५तथागोधिका
॥ इत्यादि एतेसप्तदश प्रोक्तादंडव्यूहाश्च भेदतः।तथाव्यूहयुद्धं चैवमंडलसाप्रयोभिः।असंहतास्तुषट्व्यूहास्येमव्यूह
स्तुपंचधाव्यूहतेस्तेप्रयोक्तव्यायुद्धकालउपस्थिते।पक्ष्याद नांमनैकेनहत्वाशेषैःपरिक्षिपेत्।उरसवासमाहत्यकोटीभ्यांपरिवे
ष्टयेत्।परकोटीसमाक्रम्यपक्षाभ्यामप्रतिग्रहं।कोटीभ्यांजघनंहन्यात्उरसाचप्रपीडयेत्।एवव्यूहप्रयोगेचश्रयत्नवान्ध्वजिनीद
ने।विदारयेद्व्यूहस्तैवलैश्चद्विषतांबलं।यतःफल्गुपतोभूयिष्ठैस्तयाव्यूहैरधिष्ठितं॥ततोरिपुबलंहन्यात्आत्मनश्चोपवृंहयेत्॥
द्विगुणसारेणफल्गुसारेणपीडयेत्।संहतंचरानानीकैःप्रपद्लेभावदारयेत्।दुर्ज्जयान्करिणःसिंहस्यासिक्तैर्महागजैः।हन्या
०ं समूहैःसर्वांगसंनद्धैः दृढदंतवद्धैसुकल्पितैः।ऊर्जितपाद्यैर्योधैःप्रवीरयोधैःमद्दुर्निवारैर्हन्यात्।गजेंद्रैर्द्विषतामनी

का॰ द॰ नी॰ ...पि वारयापति र्दिष्टतामनीकं हन्यात्तन्निहंति मदसत्त्वगुणोपपन्नः। नागेषु हि क्षितिभुजां विषयो निबद्धस्तस्मात् गजाधिक
...न्नृपतिः सदा स्यात्॥ ॥इति कामंदकीयनीतिसारटीकायां उपाध्यायनिरपेक्षायां गजाश्वरथपत्तीनां कर्मयान्नभूमीनां दान
...विकल्पनानां व्यूहरचनानां निर्देशो विंशः सर्गः॥ २०॥ ॥

२००

१०६